श्रीगणेशाय नमः

ओं श्रीयौधेयवंशश्रीवादियुग

गणालङ्कृतराजाधिराजश्रीम

हाराजरणवीरसिंह सौराज्ये

विक्रमादित्यशाके १९

३४ मन्वेदस्मृत्युराज्याय

[illegible]मेन श्रीरणवीरयन्त्रालये मोह

[illegible]कस्य श्रीराधेयग्रन्थितं कलो

[illegible]प्रकरणमिदम् ओं

ओं

ॐ

श्रीगणेशाय नमः ॥

अथ परस्मैपदानि नव अथ धातु आनन्त
यो थो मंगलार्थश्च संज्ञाधिकारोऽयम् वर्तमानातितस्
अन्ती स्यादिषु पतिष्ठन्ते यामितऊर्ध्वं प्रत्ययानत्र कामिष्या
मस्ते षु यानि यानि नव वचनानि तानि परस्मैपदसंज्ञा
नि भवन्ति परस्मैपदसंज्ञायाः प्रयोजनम् शेषात्का
र्तरि परस्मैपदमित्यादिषु तथाथाः सार्वधातुकामित्या

प्रशस्यात्मने अ

नः आ राय मधिकारः
यमपि संज्ञाधिकारो वर्तमानाते आते अन्ते इत्यादिषु
पतिष्ठन्ते वर्तमानादीनां यानि पराणि नव वचना
नि तान्यात्मनेपदसंज्ञानि भवन्ति आत्मनेपदसंज्ञा
या प्रयोजनम् आत्मनेपदानि भावकर्मणोरित्यादि
षु ॥ त्रीणि त्रीणि प्रथममध्यमोत्तमाः

रस्मैपदानामात्मनेपदानां चैयानि त्रीणि त्रीणि वचना
नितानि प्रथममध्यमोत्तमसंज्ञानि भवन्ति तिन्तस्
अन्ति इति प्रथमः सिथस्थ इति मध्यमः मिव्वस्मस्
इत्युत्तमः इति परस्मैपदानाम् आत्मनेपदानां यथा
ते आते अन्ते इति प्रथमः से आथे ध्वे इति मध्यमः ए
वहे महे इत्युत्तमः एवं सप्तम्यादिष्वपि ज्ञेयम् प्रथमम
ध्यमोत्तमानां पुरुषसंज्ञापि वोद्धव्या युगपद्वचने पः
पुरुषाणामिति पुरुषग्रहणं यद्भवति तत् प्रथममध्य
मोत्तमसंज्ञया क्रमप्रयोजनम् नाम्निप्रयुज्यमानेऽपि
प्रथमः युष्मदि मध्यमः अस्मद्युत्तमः इत्यादि सू

## युगपद्वचने परः पुरुषाणाम्

परिभाषेयम् प्रथममध्यमोत्तमानां युगपद्वचने
तुल्यकालमभिधाने अनियमः परः पुरुषः स एव भव
तीति परिभाष्यते एकस्मिन्वाक्ये नाम यदा सन्निहि
ते भवतः युष्मदस्मदी च तदा प्रथममध्यमोत्तमाः अ
नियमेन प्राप्नुवन्तीति नियमः क्रियते स च त्वं च अ
हं च पचामः स च त्वं च पचथः त्वं च अहं च पचावः
डुपचष् पाके डुष्वाद्यः डुत्रिमग्धात्त्रिमार्थः षका
रः आनन्तनादिभिः अवयवद्विःस्वार्थः षव
सिकार्थः वर्तमानामस् वस मस् अनिकरणः
तेरीव्यन् नकारः अनिच विकरणोऽन्वर्थः अवश्च
दीर्घः रसकारयोर्विसर्गः नाम्निप्रयुज्यमा
नेऽपि प्रथमः
नाम्निप्रयुज्यमानेऽपितिष्ठा

तेः प्रथमः पुरुषो भवति अपिशब्दादप्रयुज्यमानेऽपि ।
सपचति तौपचतः तेपचन्ति पच् वर्तमानातितस्
अन्ति अन्ति असन्ध्यक्षरयोरस्यतेऽल्लोपश्च **यु**
**ष्मदि मध्यमः** युष्मदि प्रयुज्यमाने सति धातो
र्मध्यमः पुरुषो भवति अपिशब्दादप्रयुज्यमानेऽपि त्वं
पचसि युवां पचथः यूयं पचथ **अस्मदु**
**त्तमः** अस्मदि प्रयुज्यमाने सति धातोरुत्तमः ।
पुरुषो भवति अपिशब्दादप्रयुज्यमानेऽपि अहं पचा
मि आवां पचावः वयं पचामः वर्तमाना मिवस् मा
स् अन्ति अस्य वमोर्दीर्घः **अदाप्योर्दा**
डुदाञ्दाने दाणदाने देङ्रक्षणे दोअवखण्ड
ने दाष्रूपाश्चत्वारः डुधाञ्दानधारणयोः धेट्पाने
धाष्रूपौ द्वौ षण्णामियं संज्ञा दाधाइत्येतेद्वेरूपे दासंज्ञे
भवतः अदाप् दाप् देपावर्जयित्वा दासंज्ञयोकयो
नतस्य दामागायतीत्यादेः दीयते ध पीयते दाधा
वर्तमानान्ते सार्वधातुके यण् णकारो न णकारः
उवनोचक्रीयितयोरित्यर्थः सन्ध्यक्षरान्तानामा ।
कारो विकरणेऽशित्येनयोरात्वम् दामागायति पिः
वति श्यामपतिजहातीनामीकारो व्यञ्जनादावित्याका
रस्येत्वम् डुधाहोडुनुबन्धात्त्रिमगित्यर्थः ञका र
रञ्जनादेकभयामित्यर्थः ङकार आत्मनेपदार्थः ण
कारो णोयच्छ इत्यर्थः अदाविति किम् दायन्ते व्री
हयः दायन्ते भाजनानि दाप्लवणे देप् शोधने ॥

पकार इत्यर्थः वर्तमानात्मनेपदप्रथममध्यमबहु
वचने अन्ते सन्ध्यक्षरान्तानामाकारो विकरणे सर्व
धातुकेषु णकारो न णकारेत्यर्थः असन्ध्यक्षरयो
रस्यान्तेन लोपे अकारलोपः क्रियाभावो
धातुः क्रियाभावयति व्यापारं प्रतिपादयति सः
धातुसंज्ञो भवति धातुसंज्ञायाः प्रयोजनं धातोरु
हेतावित्यादिषु भवति अस्ति जुहोति भू सत्तायां ।
अद भक्षणे हु दानादानयोः वर्तमानाति भुवः अन्ति
नाम्यन्तयोर्धातुविकरणयोर्गुणः अदः अन्ति अदादे
र्लुग्विकरणस्य अदादेर्धातोरप्रथम इति दस्य तः जु
होतेः अन्ति जुहोत्यादेर्द्वित्वं जुहोत्यादीनां सार्व
धातुके इति द्विर्वचनम् होज इति ह्रस्वः नाम्यन्तयोरि
ति गुणः क्रियाभाव इति किम् भूः वा काले
अधिकारोयम् यत ऊर्ध्वं यद्वक्ष्यामस्तत्र काले इत्युप
तिष्ठते तासां स्वसंज्ञाभिः कालविशेष इत्यतः प्रागय
मधिकारः संप्रति वर्तमाना संप्रति वर्त
माने काले वर्तमाना विभक्तिर्भवति पचति पचतः ।
पचन्ति पच् वर्तमानातिनस् अन्ति अन्ति असन्ध्य ।
क्षरलोपः स्मेनातीते स्मशब्देन योगे सति
धातोरतीते काले वर्तमाना विभक्तिर्भवति इति स्म मा
ताब्रवीति इति स्म उपाध्यायः कथयति ब्रूञ् व्यक्तायां
वाचि कथ वाक्यप्रबन्धे वर्तमानाति ब्रुवः अन्ति अदा
देर्लुक् ब्रुव ईड् वचनादिरितीट् टकार इटस्येटीत्यर्थः ना

मन्तयोरितिगुणः कथः भुवादेश्चेतीन् नकार इति ॥
लिङ्गस्यानेकाक्षरस्येत्यर्थः अस्यच लोपः कथि इति स्थिते
नेधातवइतिधातुसंज्ञायां सत्यां वर्तमानानि अपि ॥
नामन्तयोरितिगुणः **परोक्षा** धातो।
रतीतेकाले परोक्षाविभक्तिर्भवति चकारवान्मन्त्र
पजन्त्रारप्राप्तिर्दीबलेः जघानसमरेकेसंयगन्तसेहृव
येनमः उक्तअकरणे द्युस्त्रकरणे हृनहिंसागत्योः
परोक्षा अट् टकार आकारादटडौ इत्यर्थः चापरोक्षा
वेक्वीपिन सन्तल्लेषु इति द्विर्वं अभ्यासस्यादिव्यञ्जन।
मवशेषमिति नअभ्यासलोपः अकारऋवर्णस्येमकार
ऋकारस्य कवर्गस्यचवर्ग इति कस्यचः होजइति हस्य
जः हनेः अभ्यासाद्घेति धातुहकारस्य घकारः अस्यो
पधायादीर्घो वृद्धिर्नामिनामितिजस्याइतिधाइदीर्घो ।
**भूतकरणवत्यश्च** अद्यतनादिरिति धातोः प्राक्
अकारः सभूतकरणमुच्यते भूतकरणं विद्यते यासां ताभू
तकरणवत्यः धातोरतीतेकाले भूतकरणवत्योविभक्तयो
भवन्ति ह्यस्तन्यद्यतनीक्रियातिपत्त्य इत्यर्थः ह्यस्तनी अव
त् अकरोत् अहरत् हन्त्र् ह्यस् ह्यस्तनी दि इका।
रोव्यञ्जनादिस्यादिरित्यर्थः अद्यतनादिर्ह्यस्तन्यद्यतनीक्रि
यातिपत्तिश्चिति धातोः प्रागकारागमः कृनः तन्नादेरु
रितिउविकरणः करोतेरितिगुणः ह्यनः अनि चावि।
करणेइतिगुणः पदान्ते धुटां प्रथमइति दस्यतः अद्यत
नीयथा अकार्षीत् अहार्षीत् सिजद्यतन्यामिति सिच्

इकारवकारौ सिचि परस्मैइत्यर्थौ सिचि परस्मैस्वरान्ता
नामिति वृद्धिः सिचइनीट् अग्रहीत् आदिः निमित्तात्प्रत्यय
विकारागमस्थः सिः षत्वमिति सस्य षः क्रियातिपत्ति
र्यथा अकरिष्यत् अग्रहीष्यत् क्रियातिपत्तिवर्त्तिः स्या
त् स्यन्दन्तास्येति इट् गुणः षत्वम् भविष्य

## न्तिभविष्यन्त्याशीः श्वस्तन्यः

धातोर्भवि
ष्यति काल भविष्यन्ती आशीः श्वस्तनी इत्येता विभ
क्तयो भवन्ति भविष्यन्तीनां वत् भविष्यति भूसत्तायां
भविष्यन्तीस्यति इडागमो सार्वधातुकस्यादि व्यञ्जनाद
र्हस्यकारादेरितिइट् नाम्यन्तयोरिति गुणः आशीर्यो
गा भूयात् आशीः परस्मैपदप्रथमपुरुषैकवचनं या
त् श्वस्तनी यथा पठिता पठितारौ पठितारः पठअ
कार्यावाचि श्वस्तनी परस्मै तातारौतारस् इडागमः

## तासां स्वसंज्ञाभिः कालविशेषः

ता
सां परोक्षादीनां विभक्तीनां याः स्वा आत्मीयाः संज्ञाः ता
सां याभिः परोक्षत्वादि विशेषस्तेन एके काले परोक्षाद्या
या विभक्तयो भवन्ति अतीतेऽक्षेन्द्रियेभ्यो यत्प्रत्यक्षम् न
त्परोक्षम् तस्या विधेनीते काले परोक्षा त्रिषु ददा।
दहः दह भस्मीकरणे परोक्षा अ ... अकार आकारा
ददहौ इत्यर्थः चण्परोक्षा चेक्रीयितसनन्तेषु इति द्वि
अभ्यासस्यादिव्यञ्जनमवशेष्यम् अस्योपधायेति दीर्घः।
ह्यः अनद्यतनीते काले ह्यस्तनी ह्यः पापमदरत् ह्यस्
ह्यस्तनीदि अद्यतन्यादि अनिश्चिताः [illegible] अद्यतनी अतीत॥

सामान्येऽसमर्थेनानतीतविशेषेऽअकार्षीत् अहार्षीत् ।
कृञ् हृञ् अद्यतनीदि अहात्वादिः सिजद्यतन्यामिति
सिच् इकारचकारौ सिचि परस्मैपदेष्वौ सिच इतीट् सिचि
परस्मैस्वरान्तानामिति वृद्धिः यत्र क्रियाया अतिपत्तिरति
ष्यत्तिस्तथाविधे तीते काले क्रियातिपत्तिर्यथा अभोक्ष्यत
भवान् हृतेन सहृदयदि मत्समीपे आसिष्यत अन्नपालनाभ्य
वहारयोः क्रियातिपत्तिः आत्मनेस्मत अहात्वादिः नामिनश्चो
पधाया लघोरिति गुणः चवर्गस्य किरसवर्णे इति जस्य कः ।
आसउपवेशने स्मत अहात्वादिः इडागमः आशीर्लिङ् ।
भविष्यतिकालेआशीः भूयात् भूसत्तायां आशीर्यात्
श्वःप्रभृति भविष्यतिकाले श्वस्तनी कर्ता कृञ् श्वस्तनी
तागुणः अयेनाङ्. अध्ययने ङकारश्चात्मनेपदार्थः
श्वस्तनी आत्मनेपदे ता अधिपूर्वः नामन्तयोरिति गुणः
**प्रयोगात्तत्र** प्रयोगः शिष्टप्रयोगः तस्मा
द्धातोः वर्तमानादीनां विभक्तीनां कालविशेषो भवति
स्मिन्काले वर्तमानाद्या विभक्तयो विहितास्ततोऽन्यत्र
दीन्यर्थः यावज्जीवं भुङ्क्ते अन्नमभोक्ष्यते इत्यर्थः भु
नाभ्यवहारयोः वर्तमाना ते स्वराद्रुधादेः परो ना
शाहुः नस्य रुधादेर्विकरणान्तलोपः चवर्गस्य किरसवर्णे
इति नस्य ङः **पञ्चम्यनुमतौ** अनुमतिरनुज्ञा
गमः अनुमतावर्थे धातोः पञ्चमी भवति एवमस्तुप
देकृञ् अस भुवि पञ्चमीतु अस्ति अदादेर्लुग्विकरणस्य
कृञ् पञ्चमीपरस्मैपदमध्यमपुरुषैकवचने हि ततो

रेफः करोतेरिति गुणः अस्योकारः सार्वधातुके गुणोऽ
न्तरम् उकाराद्धेति हिलोपः तद्धि इयेन योगविभागे
गम्यमानार्थं पदेनानन्वयः जीवताद्भवान् जी
वतु भवान् जीवतात् त्वं जीवतु त्वं जीव प्राणधारणे
पञ्चमीतातङि वक्तव्यास्तेतातङ् ङकारोनतातङ्का
रेत्यर्थः अस्ति हेरकारादहन्तेरिति हिलोपः अका
रउच्चारणार्थः समर्थनाशिषश्च स
मर्थनायामाशिषि च वर्तमानाद्धातोः पञ्चमीभ
वति पौरुषाकोकर्मण्यध्यवसायः समर्थना अ
प्राप्तस्येष्टस्य प्राप्तीच्छा आशीः समुद्रमपि पि
बानि पर्वतमपि शिरसा धारयाणि पापाने पञ्च
मीपरस्मैपदोत्तमपुरुषैकवचने आनि अस्ति पः
पिबः तिष्ठिवादेशः धृङ् अवस्थाने ध्रियमाणोऽ
स्मिञ्ज्ञेयोनावसहेतावितीन् णकारइति लिङ्गस्यार्थः
अस्योपधे तिवृद्धिः पञ्चमीआनि अस्ति कारितस्या
यताः शेषाशिषित्वलुपि चिरंजीवतु चिरंनन्दतु जी
व प्राणधारणे टुनदि समृद्धौ इयाङ्: दुनुङ्: लोद्
रित्यर्थः इकारोनकारागमार्थः अनिदनुबन्धस्य न
मनुषोनु षङ्गलोप इति ज्ञापकान्नकारागमः पञ्च
मीत अस्ति विध्यादिषु सप्तमी च वि
ध्यादिषु समर्थधातोः पञ्चमीभवति सप्तमी च वि
धिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनापते वि
ध्यादयः प्रज्ञापूर्वकं कर्मण्यध्यवसानमधीष्ट संप्रा

क्षादिचारः प्रार्थनायाञ्च विधेतावत् यावज्जीवमधि
हीयेऽक्षकुयात् सायंप्रातःसन्ध्यामुपासीत इदानादात।
योः सप्तमीयात् अस्ति जुहोत्यादेश्चेतिलुक् जुहोया
दीनांसार्वधातुकेऽदितिद्विर्वचनं सप्तम्यां चेतिगुणाभावः
आसउपवेशाने सप्तमी ईत् अस्ति अदादेर्लुक् निमन्त्र
णे इहभुङ्क्तांभवान् भुञ्जीतवा भुजपालना भ्यवहार।
योः पञ्चमीताम् सप्तमीईत रुधादुपादेः परोनशाह्नः
नस्यकुपादेर्विकरणान्तलोपः वर्गेवर्गान्तः आमन्त्र
णे आगच्छतुभवान् आगच्छेद्वा गम्लृगतौ आज्ञा
र्वः पञ्चमीतु सप्तमीयात् अस्ति गामिष्ठयमांछः।
तिमस्यछः तस्याद्विर्भावः अचोधेप्रथमःइतिछस्यच
घोषाघोषस्यचसप्तम्याःइतिघोषाद्रस्यचत्वम् अधीष्टे सा
णवकमुपनयतांभवान् उपनयेतवा णीञ् प्रापणे
लोनेइतिणस्यनः नाम्यन्तयोरितिगुणः संप्रश्ने किंभो
करणमध्यैभे उतछन्दोऽधीयीयवा इङ् अध्ययने अ
धिपूर्वः पञ्चमीये सप्तमीईय अस्तिलुक् गुणः सम।
स्यांस्वरादाविवर्णोवर्णान्तस्यधातोरियुवावितिइयादे
शः प्रार्थनायां कन्यांप्रयच्छतुभवान् प्रयच्छेद्वा दाण्
दानेणाकारोदाणोयच्छइत्यर्थः प्रपूर्वः पञ्चमीतु स।
प्तमीयात् अस्ति दाणोयच्छः घोषाघोषस्यचसप्तम्याइति
त्वम् **क्रियासमभिहारेसर्वकालेष्वम**
**ध्येकवचनंपञ्चम्याः** पौनःपुन्यंभृशा
र्थोवाक्रियासमभिहारः क्रियासमभिहारेवर्तमाना

धातोः सर्वकालेष्वतीतवर्तमानभविष्यत्सु पञ्चम्याः
समस्थिनो मध्यमपुरुषस्यैकवचनं भवति लुनीहि लु
नीहि इत्येव लुनाति लुनीतः लुनन्ति प्रथमतावत् इमा
वलाविषाम् इमेप्रलाविषु लुनीहि लुनीहि इत्येव ग्रंथं
लविष्यति इमौ लविष्यतः इमे लविष्यन्ति लूञ् छेद
ने नंक्र्यादेः घादीनांह्रस्वः उभयेषामीकारोव्यञ्जना
दावदः इत्याकारस्य ईत्वम् णोचाभीत्यंतेहिस्थपदमि
ति लुनीहि इत्यस्य द्विर्वचनम् अन्तिप्रत्ययेक्र्यादीनां
विकरणस्य इत्यालोपः अद्यतन्यांसिच् सिच इति ईट् इ
डागमः सिचि परस्मैस्वरान्तानामिति वृद्धिः इटश्चेटी
ति सिज्लोपः तवर्गस्य षटवर्गाट्टवर्ग इति नस्य टः अ
नउस्वगुणः **माङ्योगेऽद्यतनी** माशब्देन
योगे सति धातोरद्यतनी भवति माकर्षीत् माह्वार्षी
त् भूवं माथितं नमामास्मयोगेइत्यडागमादिनिषेधः
**मास्मयोगे ह्यस्तनी च** मास्मशब्देन
योगे सति धातोरद्यतनी भवति ह्यस्तनी च मास्मका
र्षीत् मास्मकरोत् **वर्तमाना तितस् अ
न्ति सि थस् थ मि वस् मस् ते आते अन्ते
से आथे ध्वे ए वहे महे** त्यादयो वर्तमाना
संज्ञा भवन्ति वर्तमानासंज्ञायाःप्रयोजनम् संप्रति
वर्तमाने त्यादिः पचति पचतः पचन्ति पचसि पचा
थः पचथ पचामि पचावः पचामः पचते पचेते प
चन्ते पचसे पचेथे पचध्वे पचे पचावहे पचामहे प

तुबादयः असन्ध्यक्षरलोपः अस्यवमोदीर्घः याते य
थेइतिचेत्याकारस्य इत्वम् सप्तमी यात् या
ताम् युस् यास् यातम् यात याम् याव।
याम ईत ईयाताम् ईरन् ईथाः ईयाथा
म् ईध्वम् ईय ईवहि ईमहि यादयः स
प्तमीसंज्ञा भवति सप्तमीसंज्ञायाः प्रयोजनम् विध्या
दिषु सप्तमीचेत्यादिषु पचेत् पचेताम् पचेयुः पचेः प
चेतम् पचेत पचेयम् पचेव पचेम पचेत पचेयाता
म् पचेरन् पचेथाः पचेयाथाम् पचेध्वम् पचेय पचे
वहि पचेमहि पच् यादादयः अति यायाह्रस्वश्च सप्त
म्याइतियायाह्रस्य इत्वम् यामुसोरियमियुसाविति या
मियुसस्य इयमादेशः युस् इयुस्य इयुसादेशः
पञ्चमी तु ताम् अन्तु हि तम् त आनि आ
व आम ताम् आताम् अन्ताम् स्व आथाम्
ध्वम् ऐ आवहै आमहै तादयः पञ्चमीसं
ज्ञा भवन्ति पञ्चमीसंज्ञायाः प्रयोजनम् पञ्चम्यत्रा
मन्त्रावित्यादिषु पचतु पचताम् पचन्तु पच पचत
म् पचत पचानि पचाव पचाम पचताम् पचेताम्
पचन्ताम् पचस्व पचेथाम् पचध्वम् पचै पचावहै
पचामहै पच् तादयः अति असन्ध्यक्षरलोपः हेर
कारादन्नेविति हिलोपः आदातामाथा मादेरिति।
आताम् आथामित्येतयोराकारस्य इत्वम् ह्य
स्तनी दि ताम् अन् सि तम् त अम् व म त

आताम् अन्त थास् आथाम् ध्वम् इ वहि
महि   यादयो ह्यस्तनीसंज्ञा भवन्ति ह्यस्तनीसं
ज्ञयाः कप्रयोजनम् माङ्स्मयोगे ह्यस्तनी चेत्यादिषु अ
पचत् अपचताम् अपचन् अपचः अपचतम् अप
चत अपचम् अपचाव अपचाम अपचत अपचेताम्
अपचन्त अपचथाः अपचेथाम् अपचध्वम् अपचे।
अपचावहि अपचामहि एवं यादयः इकारो ऽज्जना
दिस्योरित्यर्थः पदान्ते धुटां प्रथम इति दस्य तः रसका
रयोर्विसृष्टः अड्धात्वादिः अन्ति अस्यान्तस्वरलोपः आ
दातामाथामादेरिः अस्य वमोर्दीर्घः   एवमेवा
द्यतनी एवमेव यादयः दि ताम् अन् सि।
तम् त अम् व म त आताम् अन्त थास्।
आथाम् ध्वम् इ वहि महि   अद्यतनीसं।
ज्ञा भवन्ति अद्यतनीसंज्ञयाः कप्रयोजनम् माङ्योगे ऽ।
द्यतनीत्यादिषु अपाक्षीत् अपाक्ताम् अपाक्षुः अ
पाक्षीः अपाक्तम् अपाक्त अपाक्षम् अपाक्ष्व अपाक्ष्म
अपक्त अपक्षाताम् अपक्षत अपक्थाः अपक्षाथा
म् अपग्ध्वम् अपक्षि अपक्ष्वहि अपक्ष्महि एवं या
दयः अड्धात्वादिः सिजद्यतन्याम् इकारचकारौ सिचि
परस्मैऽस्वर्थौ अस्य च दीर्घः दिस्योः सिच ईतीट् टका
रष्टष्टीत्यर्थः नकारसकारयकारेषु धुटश्च धुटी।
ति सिज्लोपः अनउसिजन्तस्वविदाभ्यो धुवः आन्सा।
वेयानकारादिन्यन्तस्यान्तलोपः धुटि चवर्गस्य कि

रसवर्णौ धकारेश्वरोऽन्तनीयश्चतुर्थे इति कस्मात्:

परोक्षा अट् अतुस् उस् थल् अथुस् अ अ
ट् व म ए आते इरे से आथे ध्वे ए वहे महे

अडादयः परोक्षासंज्ञा भवन्ति परोक्षासंज्ञायाः
प्रयोजनम् चणपरोक्षेत्यादिषु पपाच पेचतुः पेचुः पे
चिथ वा पपक्थ पेचथुः पेच पपाच वा पपच पेचिव
पेचिम पेचे पेचाते पेचिरे पेचिषे पेचाथे पेचिध्वे पेचे
पेचिवहे पेचिमहे पच् अडादयः टकारश्चाकारादटो
ऽन्यार्थः णकारोऽलकारः णलि च सेटीत्यर्थः चणपरोक्षे
ति द्वित्वं अभ्यासस्यादिव्यञ्जनमवशेष्यमिति चलोपः
अस्योपधेस्य पधादीर्घः उत्तमपुरुषैकवचने अटि
णलुत्तमो वेति मन्वान्तराद्वा उपधादीर्घः अस्यैक
व्यञ्जनमध्येऽनादेशादेः परोक्षायामिति धात्वकारस्य
एत्वं अभ्यासस्य लोपः थलि परे उपदेशेऽत्वत इति न
त्वान्तराद्वाऽऽदेः थलि च सेटीति एत्वाभ्यासलोपौ

श्वस्तनी ता तारौ तारस् तासि तास्थस् ता
स्थ तास्मि तास्वस् तास्मस् ता तारौ तारस्
तासे तासाथे ताध्वे ताहे तास्वहे तास्महे ।

तादयः श्वस्तनीसंज्ञा भवन्ति श्वस्तनीसंज्ञायाः
प्रयोजनम् भविष्यति भविष्यन्त्याशीःश्वस्तन्यस्त्या
दिषु पक्ता पक्तारौ पक्तारः पक्तासि पक्तास्थः पक्ता
स्थ पक्तास्मि पक्तास्वः पक्तास्मः पक्ता पक्तारौ पक्ता
रः पक्तासे पक्तासाथे पक्ताध्वे पक्ताहे पक्तास्वहे प

यास्महे पचु तादयः चवर्गस्यकिः आशीर्यात् या
स्ताम् यासुस् यास् यास्तम् यास्त यासम्
यास्व यास्म सीष्ट सीयास्ताम् सीरन् सी
ष्ठास् सीयास्थाम् सीध्वम् सीय सीवहि।
सीमहि    यादादयः आशीःसंज्ञा भवन्ति आ
शीःसंज्ञायाः प्रयोजनं भविष्यति भविष्यन्त्याशीःश्व
स्तन्यादिषु पच्यात् पच्यास्ताम् पच्यासुः पच्याः।
पच्यास्तम् पच्यास्त पच्यासम् पच्यास्व पच्यास्म प
क्षीष्ट पक्षीयास्ताम् पक्षीरन् पक्षीष्ठाः पक्षीयास्था
म् पक्षीध्वम् पक्षीय पक्षीवहि पक्षीमहि पचु या
दादयः चवर्गस्यकिरसवर्णे इत्वम्    स्यसे
हितानित्यादीनि भविष्यन्ती स्यति स्यतः
स्यन्ति स्यसि स्यथस् स्यथ स्यामि स्या
वस् स्यामस् स्यते स्येते स्यन्ते स्यसे स्येथे।
स्यध्वे स्ये स्यावहे स्यामहे    स्यसंहितानि
त्यादीनि भविष्यन्तीसंज्ञानि भवन्ति भविष्यन्तीसंज्ञ
याः प्रयोजनं भविष्यति भविष्यन्त्याशीःश्वस्तन्य इ
त्यादिषु पक्ष्यति पक्ष्यतः पक्ष्यन्ति पक्ष्यसि पक्ष्यथः
पक्ष्यथ पक्ष्यामि पक्ष्यावः पक्ष्यामः पक्ष्यते पक्ष्येते।
पक्ष्यन्ते पक्ष्यसे पक्ष्येथे पक्ष्यध्वे पक्ष्ये पक्ष्यावहे प
क्ष्यामहे पचु स्यत्यादयः चवर्गस्यकिः इत्वम्
स्यादीनि क्रियातिपत्तिः स्यत् स्यताम् स्यन्
स्यस् स्यतम् स्यत स्यम् स्याव स्याम स्यत

स्येतां स्यन्त स्यथाम् स्येथाम् स्यध्वम् स्ये ।
स्यावहि स्यामहि   स्यसंहितानि स्यादीनि क्रि-
यातिपत्तिसंज्ञानि भवन्ति क्रियातिपत्तिसंज्ञया
क्वप्रयोजनम् अड्ह्यस्तन्यादिष्वस्मद्यतनी क्रियाति-
पत्तिष्वित्यादिषु अपक्ष्यत् अपक्ष्यताम् अपक्ष्यन्
अपक्ष्यः अपक्ष्यतम् अपक्ष्यत अपक्ष्यम् अपक्ष्याव।
अपक्ष्याम अपक्ष्यत अपक्ष्येताम् अपक्ष्यन्त अपक्ष्य-
थाः अपक्ष्येथाम् अपक्ष्यध्वम् अपक्ष्ये अपक्ष्यावहि।
अपक्ष्यामहि अड्ह्यस्तन्यादिः फलम्   षडाद्याः
सार्वधातुकम्   षण्णामद्यतन्यादीनामाद्या
वर्तमाना सप्तमी पञ्चमी ह्यस्तन्यः सार्वधातुकसं-
ज्ञा भवन्ति सार्वधातुकसंज्ञया क्वप्रयोजनम् जुहो-
त्यादीनां सार्वधातुके इत्यादिषु जुहोति जुहुयात् जु-
होतु अजुहोत् हु दानादानयोः वर्तमानेति सप्तमीया-
त् पञ्चमी तु ह्यस्तनीति अन्ति जहेर्त्यादेशेति लक्।
जुहोत्यादीनां सार्वधातुके इति द्वित्वं होजः नाम्यन्तयो-
रिति गुणः   इति लघुवृत्त्यां बालबोधनप्रकर-
णे परस्मैपादः प्रथमः १   प्रत्ययः परः
परिभाषणम् इह या सा प्रत्ययसंज्ञा वक्ष्यमाणाः प्रत्ययाः
सप्रकृतेः परो भवतीति परिभाष्यते औपगवः अजा।
कुमारी पचति पचेत् कुम्भकारः उपगोरपत्यम् वा
त्यपत्ये णणकारो वृद्ध्यर्थः वृद्धिरादौ सति अजाद्य-
दन्तादाप् वयसि प्रथमे इति ई प्रत्ययः ईकारे...

तेभ्योऽपः ति यात् अपि कृत् जम्भहूर्तः कर्मण्यपत्

गुप्तिज्किद्भ्यः सन् गुप गोपने तिज नि-
शाने कित निवासे एभ्यः सन् प्रत्ययो भवति जुगुप्सते।
तितिक्षते चिकित्सते अनेन सन् नकारः सन्प्रत्ययस्या-
र्थः चर्परोहेति द्वित्वं अभ्यासस्यादिव्यञ्जनमव-
शेष्यम् कवर्गस्य चवर्गः खत्वम् नेयातव इतिधातु-
संज्ञायां सत्यां वर्तमाना ते अपि असन्ध्यक्षर लोपः गु-
णनिन्दायां तिचः क्षमायाम् कितो व्याधिप्रतीकारे स-
न्निष्यते मानबधदान्शान्भ्यो दीर्घश्चाभ्यासस्य
मान पूजायां बध बन्धने दान खण्डने शान तेजने एभ्यः सन् प्रत्ययो
भवति अभ्यासस्य च दीर्घः माने विचारार्थे सन्निष्यते।
शिष्टेभ्यः स्वार्थे मीमांसते बीभत्सते दीदांसते शी-
शांसते सन् द्वित्वं अनादिव्यञ्जनलोपः सन्यवर्णस्ये-
तीत्वम् तृतीयादेर्घढधभान्तस्य धातोरादिचतुर्थ-
त्वं स्ध्वोरिति बस्य भः अनेनाभ्यासस्य दीर्घः मनोरनु-
स्वारो धुटि इत्यनुस्वारः अत्रो बेधशिरोग्रयम इतिप-
स्तः धातोर्वा कर्मणः समानादिच्छा-
तिनेककर्तृकात् तुमन्तो यो धातुरि-
च्छतेर्यत्कर्म तेन समेदेककर्तृकस्तस्माद्वा सन् भवति।
भोक्तुमिच्छति बुभुक्षते भुज पालनाभ्यवहारयोः।
भोक्तुमिच्छतीति वाक्ये कृते इच्छार्थे एककर्तृके सु-
तम् नामिनश्चोपधाया लघोरिति गुणप्राप्तः चव-
र्गस्य किरसवर्णे इति जस्य कः सन् सत्वान्नामिनी

तित्रायकारलोपोनिवृत्तिः तस्मिन्निवृत्तेनिमित्ताभा
वेनैमित्तिकस्याप्यभावइति गुणादिकार्यमपिनिवर्त
ते भूत्स इतिस्थिते चत्वारोहेतिद्वित्वंद्वितीय चा
तुर्थयोरितिभस्यबः बवर्गस्यकिः प्रत्वम् पूर्ववत्स
र्वत्रादितिवर्तमानात्मनेपदंते अपि असत्यान्तरलो
पः पठे भोक्तुमिच्छतीति वाक्यमपिभवति ना

**म्न आत्मेच्छायांयिन्** नाम्नः कर्मणआत्मेच्छा
यांगम्यमानायांयिन्भवति पुत्रमिच्छत्यात्मनः पु
त्रीयति पटीयति अनेनायिन् इकारनकारौ यि
न्वर्णस्येत्यर्थौ यिन्वर्णस्येति ईत्वम् नेयातवा
इतिधातुसंज्ञायांवर्तमानातिप् अपि **काम्यच**

नाम्नःकर्मणआत्मेच्छायांगम्यमानायां का
म्यच्प्रत्ययोभवति चकारात्पूर्वेणयिन् च पुत्रमि
च्छत्यात्मनः पुत्रकाम्यति पक्षे पुत्रीयति **उ
पमानादाचारे** उपमानात्कर्मणआचा
रार्थेवायिन्भवति अपुत्रं पुत्रमिवाचरति पुत्री
यति अरथ्यं रथमिवाचरति रथीयति **का
र्तुरायिःसलोपश्च** उपमानात्कर्तुराचा
रेर्थेवाआयिर्भवति सकारस्यचवालोपः काकःश्ये
नइवाचरति श्येनायते हंसोब्राह्मणइवाचरति
ब्राह्मणायते उदकंपयइवाचरति पयायते पय
स्यते अनेनवासलोपः नामिव्यञ्जनान्ताद्वाये ग
देरिति आलोपः इकारआयन्तादेरर्थः इ।

कारिते च धात्वर्थे नाम्नः कर्मणो धात्वर्थेऽभि
धेये इन् भवति स च कारितसंज्ञः मुण्डं करोति मुण्ड
यति मिश्रयति लवणयति अनेन इन् नकार इति लिङ्गस्थाने
कारान्तरस्यार्थः इति लिङ्गस्थानेकाक्षरस्यान्त्यस्वरादेर्लोपः
कारितस्य गुणः धातोश्च हेतौ हेतावर्थे धातोरि
न् भवति स च कारितसंज्ञः कारयति पाठयति कृञ् करणे पठ व्य
क्तायां वाचि कर्तृदेश अनुक्रमे पठ दश अनुक्रमे इन् अस्योपधाया दीर्घो
वर्तमानानि अन्ति गुणः चुरादेश्च चुरादेर्ग
णात् इन् भवति स च कारितसंज्ञः चोरयति चिन्तयति
लक्षयति स्फेटयति चुर स्तेये चिति स्मृत्याम् लक्ष दर्श
नाङ्कनयोः स्फट ईप्सायाम् अनेन इन् अस्य च लोपः ।
नामिनश्चोपधाया गुण इति गुणः अनिदनुबन्धाना
मगुणेऽनुषङ्गलोप इति चापकारान्नकारागमः इ
नि लिङ्गस्थानेकाक्षरस्यान्त्यस्वरादेर्लोपः
अनेकाक्षरस्यानेकस्वरस्य लिङ्गस्यान्त्यस्वरादे
र्लोपो भवति इनि परे पटुमाचष्टे पटयति मिश्रयति
लवणयति प्राक्साधितम् इष्ठवदन्ते ल
घोर्ऋजनादेः ऋजनादेर्लघोर्ऋकारस्य रा
देशो भवति पृथुमाचष्टे प्रथयति मृदुमाचष्टे
म्रदयति भृशमाचष्टे भ्रशयति कृशमाचष्टे क्रशा
यति परिवृढमाचष्टे परिव्रढयति अनेन रादेशः
[illegible] कीर्तितं क्रियासा
[illegible]

हारः क्रियासमभिहारेवर्तमानाद्धातोरेकस्वराद्व्यञ्जना
नादेर्यङ्आगमोभवति सचचेक्रीयितसंज्ञः पुनः
पुनर्यजति भृशंवायायज्यते पुनःपुनर्ज्वलति भृ
शंवाजाज्वल्यते पुनःपुनःकरोतिभृशंवाचेक्रीय
ते यजदेवतापूजासङ्गतिकरणदानेषु ज्वलदीप्तौ
डुकृञ्करणे अनेनयङ्प्रत्ययः चणपरोक्षेतिद्वित्वं दी
र्घोनागमान्तस्येतिदीर्घः कृञः ऋतईदन्तस्येक्रीयित
इतिईकारागमः रत्वम् चेक्रीयितान्तात् ङित्वे आत्म
स्येक्रीयितस्याभ्यासस्यगुणः आत्मनेपदे ते गु

**गुपूधूपविच्छिपणिपनेरायः** गुपूरक्षणे धू
पसन्तापे विच्छगतौ पणव्यवहारेस्तुतौच पनच प
भ्यआयप्रत्ययोभवति गोपायति धूपायति विच्छा
यति पणायति पनायते अनेनआयः **तेधात
वः** तेसनादिप्रत्ययान्ताः समुदायाःधातुसंज्ञाभ
वन्ति तत्रप्रत्यये आत्मक्रिङ्गः सन्प्रत्ययति नाम्नआत्मे
च्छायांयिन् शुभकाम्यति काम्यचेतिकाम्यः पोताय
ते कर्तुरायिः सलोपश्चेतिआयिः **चकास्कास्प्र
त्ययान्तेभ्यआम्परोक्षायाम्** चकास्दी
प्तौ कास्शब्दकुत्सायाम् प्रत्ययान्तेभ्यश्चसमुदायेभ्यः
परोक्षायांपरस्मात्आम्भवति चकासांचकार कासांच
के परोक्षा अइए अनेनआम् आमःकृञनुप्रयुज्यते इ
ति आमन्तात्परःकृञ् कृञ्अणपरोक्षेतिद्वित्वे अका
रस्यवर्णस्य कवर्गस्यचवर्गः अस्योपधेतिअकारस्या

वृद्धिः पश्चत्वयोरत्वम् अयामन्तेभ्यः जुगुप्सांचक्रे गो
पायांचकार प्रत्ययात्मनःगेषेति वाक्यम् एवं धूप
कास्यांचकार पणायांचक्रे पणन इवाचचार कथया
यितेति आपिः नाम्यादेर्गुरुमतोऽनृच्छः
नाम्यादिर्यो गुरुमान्धातुस्तस्मात्परोक्षायामाम्भ
वति अनृच्छः ऋच्छ इन्द्रियप्रलयमूर्तिभावयो
रित्येतं वर्जयित्वा ईहांचक्रे ईक्षांचक्रे ईह चेष्टाया
म् ईक्ष दर्शनाङ्कनयोः उञ्छांचकार उञ्छ आर्जवे सं
योगे गुरुरिति अकारस्य गुरुत्वम् अनृच्छ इति किम् ।
आनर्च्छ ऋच्छ अट् द्वित्वं अकारऋवर्णस्य अत आ
दः सवर्णेति दीर्घः ऋकारेद्वितिनागमः ऋच्छ ऋत इ
तिधातुऋकारस्य गुणः आसिदय्यायिदरिद्रा
भ्यश्च आस उपवेशने दय दानगति रक्षा
अय गतौ दरिद्रा दुर्गतौ एभ्यः परोक्षायामाम् भा
वति आसांचक्रे दयांचक्रे पलायांचक्रे दरिद्रांचकार
अय गतौ परापूर्वः उपसर्गस्यायताविति रस्य लत्वम् शेषं
पूर्ववत् उषविदजागृभ्यो वा उष दाहे ।
विद ज्ञाने जागृ निद्राक्षये एभ्यः परोक्षायामाम् भ
वति ओषांचकार विदांचकार जागरांचकार आ
मि विदेर्वेति गुणाभावः पक्षे उवोष विवेद जजागा
र अट् द्वित्वं उपधागुणः अभ्यासस्यासवर्णे इत्यभ्या
सस्य उत्वं जागर्तेः अस्योपधेति वृद्धिः अभ्यासस्य ह्र
स्वः भीह्रीभृहुवां सार्वधातुकवत् ।

ञिभीभये ञिकारोनुबन्धमतिबुद्धीत्यर्थः ह्रील
ज्जायाम् डुभृञ्धारणपोषणयोः डुकारोड्वितस्त्रिम
त्तेन निर्वृत्तमित्यर्थः हुदानादानयोः एषांपरोक्षायांवा
आम्भवति सचसार्वधातुकवत् सार्वधातुकपरेया
त्कार्यमुक्तम् अस्मिन्परेयत्तद्भवतीत्यर्थः बिभा
यांचकार जिह्रयांचकार बिभरांचकार जुहवां
चकार अह अनेन आम् अवि श्लोत्पादस्येति लु
क् श्लोह्यादीनामिति द्विर्वे ह्रस्वः द्वितीय चतुर्थ
योरितिभस्य वः ह्रोजः भट्जोभ्यासस्य अकार अद
र्णस्य नस्यभ्टह्वाद्याऊमिदिति इत्वम् नामन्तयो
रितिगुणः कृञ्चानुप्रयोगादि आगच्छ पक्षे बिभाय जि
ह्राय बभार जुहाव अह अस्योपधेतिवृद्धिः आ
मःकृञ्चानुप्रयुज्यते आमन्तस्यधातुस्य लिट्।
अनुप्रयुज्यते पश्चात्प्रयुज्यतेइत्यर्थः उदाहरणानि।
प्रागुक्तानि अस्मैवाचपरस्मै आमन्तस्य स
मुदायस्य असभुवि भूसत्तायामित्येतौ धातू चपा
श्चात्प्रयुज्यते आत्मनेपदस्यपरस्मैपदादेशश्चभवति।
ईहांमास ईहांबभूव ईहदर्शनाकलयोः परोक्षा प
तामादेशेकृततोन्टश्चइत्याम् अनेनासभुवोरनुप्रयो
गः एषामपरस्मैपदादेपाः द्विर्वे अस्तेरभ्यासस्याकारादेः स
वर्णेतिदीर्घः भुवोरभ्यासस्यह्रस्वः भवतेरस्यकारस्य
अकारः द्वितीयचतुर्थयोरितिभस्यवः भुवोवुना
इतिवुकारागमः सिजभ्यस्तम् पा

तोः सिच् भवति अद्यतन्यां परतः अकार्षीत् अहार्षी
त् अचैषीत् अनैषीत् क्रम् क्लम् चिञ् चये णीञ् प्रा
पणे णेनः अद्यतनीदि सिच् सिच इति ईट् सिचि पर
स्मै इति वृद्धिः अह्नान्वादिः सत्वम् अभैत्सीत् अच्छै
त्सीत् भिदिर् विदारणे छिदिर् द्वैधीकरणे इकार
रेफाग्रणपदत्ववन्धौ विकल्पेनाणौ सिच् अञ्जना
न्तानामनिटामिति उपधावृद्धिः अद्याबषष्विटामि
तिदस्यतः अकृत अहृत अद्यतन्यात्मनेपदे न सि
च् तस्यझल्झानिट इति लोपः अक्तोहृङ्गन्ह इतीड
भावः      सस्यानिटः धाट्रन्तान्मुपधा।
हृदृशाः      अनिटः सिङन्तात् नाम्युपधात् अदृ
शः हशवर्जितात् धातोः सत्भवति अद्यतन्यां प
रतः सिचोबाधः अविक्षत् अविक्षत् अधुक्षत् वि
शप्रवेशने लिशदीप्तौ दुहप्रपूरणे अद्यतनीदि अ
ह्नान्वादिः सततताकारेन तकार इति ग्रन्थाभावार्थः।
तृतीयार्द्धे ढषभान्तस्येति दस्यधः सढोः कः से इति ष
स्य कः अचोषषस्विटामिति वस्यकः सत्वम् अनि
ट इति किम् अकोषीत् कुषनिष्कर्षेदि सिच् इट् ईट।
इटसेटीति सिज्लोपः नामिनश्चोपधाया इति गुणः सि
ङन्तादिति किम् अभैत्सीत् भिदिर् विदारणे नाम्यु
पधादिति किम् अधाक्षीत् दहभस्मीकरणे अद्यत
नीदि अह्नान्वादिः सिच् ईट् अस्य च दीर्घ इत्युपधादी
र्घः दादेर्धः तृतीयादेर्घढधभान्तस्येति दस्य धः अद्या

हेष्विणिटामिति चस्य कः अहेषा इतिकिम् अदासीत् ह
श्विट् श्वेतते अश्वेतीदि सिच् ईट् सकिट्श्वोनागमो
कारइसकारागमयोकारागमः रत्वम् अस्यदीर्घः छ
श्वोश्वेति घासघः घढोः कस्से इतिकत्वम् अघासादिः

श्रिद्रुस्रुकमिकारितान्तेभ्यश्चण्कर्त
रि श्रिञ् सेवायां द्रु गतौ स्रु गतौ कमु कान्तौ ए
भ्यो धातुभ्यः कारितान्तेभ्यश्च चण् भवति कर्तृवाचि
स्यामयतन्यावरतः अशिश्रियत् अदुद्रुवत् असुस्रु
वत् अचयतनीदि अनेन चण् चकारः स्वापेश्चणीत्या
र्थः णकारो न णकारेत्यर्थः चण्परोहेति द्वित्वं स्वरा
दाविवर्णोवर्णान्तस्य धातोरियुवावितीयुङ् उवङ् अचा
कमत कमु कान्तौ उकार उदनुबन्धमूर्द्धिं शामिस्या
र्थः कदादित्वादात्मनेपदम् न चण् कम् द्वित्वं
अनादिव्यञ्जनलोपः कवर्गस्य चवर्गः कारितान्तेभ्यः
अचीकरत् अजीहरत् अपीपचत् अपीपठत् कृञ्।
हृञ् पच् पठ ऊर्वन्तेष्वप्सु एवं हारते पचते पठते
धातोश्च हेतौ णितिइन् अस्योपधेति ह्रादि दीर्घौदि चा
ण् कारितलोपः इतिकृते स्थानिवदिति वचनात् कृ
हृ पच् पठ् द्वित्वं अभ्यासस्यादिव्यञ्जनमवशेष्यमि
त्यनादिव्यञ्जनलोपः ऋकारऋवर्णस्य कवर्गस्य च
वर्गः हेर्जः इस्समानलोपोपधायाह्रस्वश्चणि सप
धाह्रस्वः अलोपे समानस्य सन्वल्लघुनि चण्परे इति।
सन्वद्भावात् अवर्णस्येति इत्वम् दीर्घो लघोः कर्तरी।

तिकिम् अकार एधिधातोः कोऽटादेवदत्तेन ऊर्वस्मायङ्क्ता
नेनेति वाक्ये कृते धातोस्सेनावेति इत्र वृद्धिः अट ।
तनी आत्मनेपद प्रथमपुरुष द्विवचन माताम् अङ्गा
त्वादिः सिच् इकार चकारौ सितौ परस्मैपदी इत्या
मोस्मार्धधातुकस्येतिइट् एतः पररूपत्वम् अस्म

**स्यवचिख्यातिलिपिसिचिह्वः** अस्यतेपतो

वचभाषणेऽनुवेव चिर्वा ख्या प्रकथने चाहिङ्ः ख्या १
ञ्वा लिप उपदेहे षिच क्षरणे ह्वेञ् स्पर्धायां शब्दे च प
भ्यः कर्त्तृवाचिभ्यामपरतभ्यो परतः अङ् भवति ङका
रो नङकारेत्यर्थः सिचोवाधः पर्यास्थल पर्यास्थेताम्
पर्यास्थन्नपरिपूर्वः अथ तन्यात्मनेपद प्रथमपुरुषेक
वचनम् त द्विवचनमाताम् बहुवचनमन्त आ
नेन अङ् अस्यतेस्थान्नइतिथकारागमः आतानामा
त्यामादेशितित्वम् अवर्णस्याकारः अवोचत् अवो
चताम् अवोचन् वचभाषणे अवोवचिर्वा अपदि
ताम् अत अनेनअङ् अतिवचोराडुपथायाइत्वपथा
यौत्वम् अतन्मलरलोपः अहात्वादिः अख्यात् अ
ख्यताम् अख्यन् ख्या प्रथने चलिङ्ः ख्या ञ्वा आर्धसूत्रेः
अपरिताम् अव अनेनअङ् आलोपोसार्वधातुक १
स्यतालोपः अलिपत् असिचत् आह्वत् लिपउपदेहे
षिचक्षरणे ह्वेञ् स्पर्धायांशब्देच आसूर्वः अपादि अ
नेनअङ् अहात्वादिः ह्वेञः सन्ध्यन्तराणानामाकारो
विकर्णेनइत्याकारः नसपाणलोपः ञ्चभा १

दिद्युताद्यॢकारानुबन्धेभ्यो लिप्सतिशास्तिभ्यश्च पर
स्मै   पुष पुष्टौ शुष शोषणे तुष प्रीतौ दुष वैकृत्ये श्लिष
आलिङ्गने शक विभाषितो मर्षणे ञिदा गात्रप्रक्षरणे ञिमि
दा स्नेहने क्रुध कोपे क्षुध बुभुक्षायाम् शुध शौचे षिधु संरा
द्धौ राध हिंसासंराद्ध्योः णश अदर्शने तृप प्रीतौ दृप हर्ष
मोहनयोः द्रुह जिघांसायां मुह वैचित्ये ष्णुह उद्गिरणे ष्णिह
प्रीतौ एते पुषादयः द्युत दीप्तौ श्विता वर्णे ञिमिदा स्नेह
ने ञिक्ष्विदा स्नेहनमोचनयोः रुच दीप्तावभिप्रीतौ च घु
ट परिवर्तने रुट लुट प्रतिघाते शुभ दीप्तौ क्षुभ सञ्चलने
णभ तुभ हिंसायाम् स्रंसु ध्वंसु भ्रंसु अवस्रंसने ध्वंसु गतौ
स्रम्भु विश्वासे वृतु वर्तने वृधु वृद्धौ शृधु शब्दकुत्सायाम्
स्यन्दू प्रस्रवणे कृपू सामर्थ्ये एते द्युतादयः एभ्यस्तथा
ॡकारानुबन्धेभ्यः लिप्सतिशास्तिभ्यश्च अङ् भवति अ
द्यतन्याः परस्मैपदे परे अनीति अगतिशापनयोः अनुग
ताविति वा शास्तीति शास अनुशिष्टौ   पुषादिद्यु
ताद्यॢदितः   अपुषत् अशुषत् अतुषत् इ अद्युता
दिभ्य आत्मनेपदिभ्योऽपि अङ् स्याल्लुङीति तन्त्रान्तराद्धा परस्मै
पदम् अद्युतत् अश्वितत् पक्षे अद्योतिष्ट अश्वेतिष्ट अ
यत क्लिद् इट् नामिनश्चोपधेति गुणः प्राप्तम् नवर्णस्येति
नस्पष्टः ॡकारानुबन्धेभ्यो यथा अगमत् अपप्तत् अश
कत् गम्लृ गतौ पत्लृ गतौ शक्लृ शक्तौ लकारः स्वार्थः
अशादि अनेन अप्तपतेः पप्तिरिति पत आदेशः अशकत् अ
दभत् अपादि अनेन अस्य अदेशः स्वस्य यतनः पाति

चस्लृ आदेशः लृकारइत्यर्थः आरत् अस्मरत् स्म स्म अथ
टि अनेन अङ् अक्लिसन्योरङीति अङः अर्तेरवर्णस्यका
रः सर्वत्राद्यात्वादिः अशिषत् शासइदङ्हलोः अथदिअ
नेन अङ् शासेरिडुपधाया अङ्व्यञ्जनयोरितीत्वम् शा
सिवसिघसीनां चेति षत्वम् परस्मा इति किम् अत्यस्त
त अपचेष्टो अथ तन्यात्मनेपदप्रथमपुरुषैकवचने
न सस्मनिट इति सस्य णकारो न णकार इत्यर्थः विद्युति
पूर्वौ अद्यात्वादिः कर्मव्यतिहारे आत्मनेपदं तषदोऽक
स्य इति षस्य कः निमित्ताभावेति सणः सकारस्याभाव
म्

इ आत्मनेपदे प्रथमैकवचने

पद
गतावित्यस्मात्कर्तृवाचिन्या अद्यतन्या आत्मनेपदप्रथ
मपुरुषैकवचने परे इच् भवति उदपादि सवर्णम् सम
पादि कार्यम् पदगतौ अथ न अद्यात्वादिः अनेन इच्
चकार इचस्तलोप इत्यर्थः अस्योपधायेति दीर्घः इचस्तलो
प इति तशब्दलोपः प्रथमैकवचने इति किम् उदपत्थाः
आत्मनेपदमध्यमपुरुषैकवचने थास् सिच् अटश्च
टीति सिचो लोपः अचो घोषघिटामिति दस्य तः एकव
चने इति किम् उदपत्साताम् उदपत्सत अथ यर्ताम्
अन्त सिच् आत्मने चान कारादिति अन्त इत्यस्य न लोपः
अघोषे घिति दस्य तः

भावकर्मणोश्च

धातो
रिच् भवति भावकर्मवाचिन्या अद्यतन्या आत्मनेपदप्र
थमपुरुषैकवचने परे भावो धात्वर्थः स च यत्र क्रिया
कर्म भवति अथ अशायि भवता शयनमकारीत्यर्थः शी

१७

ङ् स्वप्ने अस्य न अह्वात्वादिः अनेनइच् अस्योपधेतिवृद्धिः
इचस्तलोपः कर्मणि यथा अकारि अस्वापि कृञ्च् अ
स्य न अनेनइच् अस्योपधेतिवृद्धिः दीर्घौ अह्वात्वादिः
सार्वधातुके यण् धातोः यण् भवति भा
वकर्मविहिते सार्वधातुके परे अस्यते भवता शय्यते भ
वता आस उपवेशने शीङ् स्वप्ने ङकार आत्मनेपदार्थः
वर्त्तमानाते अनेन यण् णकारो न णकारेत्यर्थः शीङः
अयिर्ये इति ईकारस्य अयि आदेशः कर्मणि यथा क्रिय
ते कटो देवदत्तेन ह्रियते भारो भृत्येण वर्त्तमाना ते यण्
शीङोऽयिर्ये इति ईकारागमः रत्वम् अन्विकर
णः कर्तरि धातोरन् भवति सचाविकरणसंज्ञः।
कर्तृविहिते सार्वधातुके परे विकरणसंज्ञया क्व प्रयो
जने अनि च विकरण इत्यादिषु भवति गच्छति अत्ति भू
सत्तायाम् गम्ऌ गतौ अद भक्षणे वर्त्तमानाति अनेन अ
न् नकारो नित्त विकरणोत्यर्थः भवतेरनि च वि
करणे इति गुणः गमेः गमिष्यमां छ इति छः न स्यादि
मां स्वरपरश्छकार इति द्वित्वम् अघोषे प्रथम इति छस्य
चः अदेरदादेर्लुक् अघोषशीतामिति दस्य तः सार्व
धातुक इति किम् भविता भू सत्तायाम् श्वस्तनीता इट्
नाम्यन्तयोरिति गुणः कर्तरीति किम् पच्यते पच् ते सा
र्वधातुके यण् दिवादेर्यन् दिवादिगणात् य
न्विकरणो भवति कर्तृविहिते सार्वधातुके परे दीव्यति
सीव्यति नृत्यति दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तु

निवृत्तिस्तुतनन्नसन्ताने नृतीगात्रविक्षेपे उकारउदनुबन्ध
पृथक्करणार्थः ईकारोनुडीक्षूदनुबन्धोत्यर्थः धात्वा
देः षस्य सः वर्तमानाति अनेन यत् नकारो णत्वोकार
स्येत्यर्थः अन्तिचविकरणोऽपीतिनियमाद्गुणाभावः ना
मिनोधोरकुरुच्छुरोर्व्यञ्जने इति इकारस्यदीर्घः **श्नुः**
**स्वादेः** स्वादेर्गणात् श्नुविकरणोभवति कर्तृविहि
ते सार्वधातुके परे सुनोति चिनोति दुनोति अश् अभि
षवे धात्वादेः षस्य सः चिञ्चये टुदु उपतापे दुनोतेः दुनव
त्यादयुरित्यर्थः अनेनश्नुः अन्तिश्चविकरणोऽपीतिनियमा
द्गुणाभावः नाम्यन्तयोर्धातुविकरणयोर्गुण इति
विकरणस्य गुणः सवृतः सन्वन्ति ह्निवयवृत्वयोश्चप
रस्मा इतिगुणाभावः नोर्विकरणस्येति वत्वम् सार्वधा
तुके इति किम् सोता सवितनीता गुणः कर्तरीति किम्
देवदत्तेन सूयते सोमः वर्तमानाते सार्वधातुके यण् ना
म्यन्तानां यण्मायीति दीर्घः **क्रवः श्नु च** क्रुश्रव
णे श्नुस्य कर्तृविहिते सार्वधातुके परे श्नुविकरणोभ
वति क्रवस्य कृ आदेशः कृणोति कृणुयात् कृणोतु
अकृणोत् सार्वधातुके इति किम् क्रोता कृवितानी ना
गुणः कर्तरीति किम् कृयते शाहः वर्तमानाते यण् ना
म्यन्तानां यण्मायीति दीर्घः **स्वाङ्यादेः श्ना**
**तुवाहः** क्र्यादेर्गणात्सवातत्वेन शाहविकरणो
भवति कर्तृविहिते सार्वधातुके परे अनोनायः सृणा
ति क्षयिह भावनो इकारे केोड्डागपदत्वबन्धोविक

ऽनेनानर्थौ वर्त्तमानाति अनेनस्वरात्परोनुषङ्गः बुधा
धभेभ्यस्तथोर्धोदइतितस्यधः धुटांतृतीयश्चतुर्थेइति
धस्यदः रष्टवर्णेतिनस्यणः एवं रुन्ध्यात् सप्तमीया
त् रुधादेर्विकरणान्नलोपः वर्गे वर्गान्तइतिणत्वबा
धनार्थोनस्यनः रुणद्धु पञ्चमीतु अरुणत् ह्यस्तनी
दि तस्यव्यञ्जनादिस्यादितिलोपः पदान्तेधुटांप्रथमइ
तिधस्यतः अड्धात्वादिः एवं भिनत्ति भिन्द्यात् भिनत्तु
अभिनत् साधनेऽप्यवत् सार्वधातुकेइतिकिम् रो ।
द्धा भेत्ता नामिनश्चोपधायालघोरितिगुणः धढधभे
भ्यस्तथोर्धोदइतितस्यधः धुटांतृतीयश्चतुर्थेइतिधस
दः ॥ तनादेरुः ॥ तनादेर्गणादुर्विकरणोभ
वति कर्त्तृविहितेसार्वधातुकेपरे अनोबाधः तनोति ।
तनुयात् तनोतु अतनोत् तनुविस्तारे अनेनउः सप्तम्यां
वेतिशास्त्रत्वयेगुणाभावः नाम्यन्तयोरितिगुणः एवं स
नोति सनुयात् सनोतु असनोत् षणुदाने धात्वादेः ष
स्सः धुटिखनिसनिजनामितिआपकासस्यानः सार्वधा
तुकेइतिकिम् सनिता श्वस्तनी ताइट् ॥ नाक्र्यादेः ॥
क्र्यादेर्गणान्नाविकरणोभवति कर्त्तृविहितेसार्वधा
तुकेपरे क्रीणाति क्रीणीयात् क्रीणातु अक्रीणात् डु
क्रीञ् द्रव्यविनिमये डुपोर्हो डुर्वत्वात्त्रिमागमार्थः व
र्तमानाति सप्तमीयात् पञ्चमीतु ह्यस्तनीदि अनेनना
विकरणः तस्यसप्तम्यां उभयेषामीकारोव्यञ्जनादावा
दस्याकारस्य ईकारः सार्वधातुकेइतिकिम् क्रेता श्वस्त

नीता अताः आनव्यञ्जनान्नाड्डौ आदि
वर्णस्थ व्यञ्जनान्नाड्डातोः आनविकरणोभवति ङौ
परे नशासः अघात् अघात् अघान वधान रुद्धा
त् अबद्धौ अघस्थेये अघाभोजने बन्धबन्धने श
कृउघादाने पञ्चमीहि अनेनआन देरकारादट्टनीरि
तिहिलोपः बन्धेरनिदन्तबन्धेन्त्यत्र घक्लोपः ग्रहेर्थ
हिआवयीतिसंप्रसारणम् व्यञ्जनान्नादितिकिम् क्री
णीहिउभयेषामीकारइतिईकारः ङावितिकिम् अ
स्नाति आत्मनेपदानिभावकर्मणोः भा
वोधात्वर्थस्तस्मिन्क्रियायाः कर्मत्वेनविवक्षिते अया
सिंश्चद्रव्यकालादौकर्मण्यभिधेये आत्मनेपदानि।
भवन्ति आस्यतेभवता शय्यतेभवता आसनंक्रि
यते शयनंक्रियतइत्यर्थः कर्मणियथा क्रियतेका
टः क्रियतेभारः मासमास्यते गोदोहमास्यते क्रोशंआ
स्यते क्रुशि आस् निषद् शायनेमिकारोन्यत्रवन्य
मतीत्यर्थः स्वपिवचियजादीनांचेतिस्वपः वकारस्य
संप्रसारणमुकारः कर्मवत्कर्मकर्ता क
र्मैवकर्ता कर्मकर्ता कर्मवद्भवति कर्मणियानिका।
र्याणितानिकर्मकर्तर्यपिभवन्तीत्यर्थः कानिकार्या
णश्रकानि आत्मनेपदानिभावकर्मणोश्चेतिइच्चु सा
र्वधातुकेयक् पच्यन्तेनतण्डुलाःस्वयमेव भिद्यतेकु।
सूलःस्वयमेव छिद्यतेरज्जुःस्वयमेव अपाचिओदनः।
स्वयमेव अभेदिकुसूलःस्वयमेव अच्छेदिरज्जुःस्वय

मेव   कर्तरिरुच्यादिजात्रयेभ्यः   रुचि
मद्दत्यादेर्धातुपाठेऽनुदात्तानुबन्धाः पठ्यन्ते तेभ्यो धा
तुभ्यो ङकारानुबन्धेभ्यश्च कर्तर्यर्थे आत्मनेपदानिभ
वन्ति रोचते दीप्यते एधते स्पर्धते आशास्ते रुचदी।
प्तौ दीपीदीप्तौ ईकारोनदीर्घः ईदनुबन्धेत्यर्थः एधवृ
द्धौ स्पर्धसङ्घर्षे आङःशासु   इच्छायाम् ङकारः पर्य
दाङ्कोगेपञ्चमीत्यर्थः ते आनि शासेःअदादेर्लुक् दी
पेः दिवादेर्यन् रुचेः नामिनश्चोपधाया इतिगुणः स्प
र्धे एधाश्चोपधार्थे आशाशासे परोक्षाय सर्वत्रात्मने।
इतिगुणाभावः एधेःनाम्यादेर्गुरुमतोऽनृच्छ इत्याम् ।
स्पर्धेःशिरसोऽघोष इत्यभ्यासस्य सकारान्तरः पकारःस
सस्वरःशिष्यते अन्यल्लुप्यते आतुबन्धेभ्योयथा शेते।
स्ते शीङ् स्वप्ने षङ्प्राणिगर्भविमोचने ङकारइत्यर्थः
धात्वादेःषस्सः अविपदादेर्लुक् शीङःसार्वधातुके इति।
शीङ्गुणः सर्वेषामात्मनेइतिसूत्रेगुणाभावः शिपु
सूङ्वे धात्वादेःषस्सः परोक्षाय द्विर्वचनं यइवर्णस्येति
ईकारस्ययत्वम् सूङःस्वरादाविवर्णोवर्णान्तस्येति उव्।
धत्वम्   येङ्क्रीयितान्तात्   येङ्क्रीयितान्ताद्धातो
रात्मनेपदंस्यात् पापच्यते पापठ्यते डुपचंष् पाके पठ
व्यक्तायांवाचि अत्यर्थंपचति अत्यर्थंपठति अतिवाक्यो
क्ते धातोरेकस्वरात् यङ्बाहुल्येक्रीयितेनक्रियासमभिहारे
इतिवाच्चः चणपरोक्षेतिद्विर्वे अभ्यासस्यादि अञ्जनम
वशेषाम् दीर्घोनागमानस्येति दीर्घः   आद्यन्तावे

आपिशब्दयोगान्नात्मनेपदादात्मनेपदं भवति फेनायते।
पयायते पयस्यति नदीयते नदीं वाचरति पयस्वद्दी।
शाह्वाभ्यां परस्मायेः नामिव्यञ्जनान्तादायेरादेरिन्याली।
पः ॥ इन्ञज्ञादेरुभयम् ॥ इन्नतेभ्यः स्वरदायेभ्यः
ञकारानुबन्धेभ्यश्च यज्ञादिभ्यश्च कर्तरि उभयपदं परस्मै
पदमात्मनेपदं च भवति तत्र परार्थे क्रियाफले परस्मै
पदमात्मार्थे क्रियाफले आत्मनेपदम् पाचयति ओदनं
भृत्यः सूदेन स्वाम्यर्थं पाचयते ओदनं सूदेन स्वामी पच
पचमाने प्रयुक्ते धातोश्च हेतावितीन् अस्यापर्येस्तु यथा
दीक्षेः पाचिः इति स्थिते ते धातव इति धातुसंज्ञायां सत्यां अ
नेन वर्तमाना तिते अपि नामन्त्ययोरिति गुणः पचस्व।
ञकारानुबन्धेभ्यो यथा कटं करोति भृत्यः कटं कुरुते स्वा
मी डुकृञ् वर्तमाना तिते तनादेः कृञ इति उ विकरणः करो
तेरिति धातोर्गुणः अस्योकारः सार्वधातुके गुणो ह्रस्व का
रस्य उकारः चिनोति शय्यां भृत्यः स्वाम्यर्थम् चिनुते।
स्वामी चिञ् चये वर्तमाना तिते अस्वादेः नामन्त्ययोरिति
विकरणस्य गुणः यज्ञादिभ्यो यथा यजन्ति याजकाः य
जते यजमानः पचन्ति सूदाः पचते स्वर्दी यज देवतापू
जासङ्गतिकरणदानेषु डुपचँष् पाके वर्तमाना अन्ति ते
अपि अस्यान्त्यस्वरयो रस्येन तल्लोपश्च ॥ पूर्ववत्सन्न
न्तात् ॥ सनः पूर्वो यो धातुस्तस्माद्येनैव तिप्रत्ययेन पर
स्मैपदमात्मनेपदमुभयपदं च भवति तेनैव तिप्रत्ययेन
सन्नन्तादपि भवतीत्यर्थः बुभूषति शुश्रूषते पिपा

शायिषते पिपठिषते भूसत्तायाम् सन्वदीर्घो यीडुत्स्वश्चे।
डुपचंष्पाके भवितुमिच्छति रोचिषते शायिषते पठ्यामि।
तिवाको कृते धातोर्वाकर्मणस्समानकर्तृकादिति सन् द्विर्वः
ह्रस्वः द्वितीयचतुर्थयोः प्रथमस्तृतीयावितिभस्य बः
भवतेः उवर्णात्तु पादिस्योति इडभावः नाम्यन्तानाम
निटामितिगुणाभावः अभ्यस्य ह्रस्वः उत्तुणः विजिगीषते प
राजिगीषते जिजये विपराभ्यां जेरिति विजेतुमिच्छति परा
जेतुमिच्छति सनि जेर्गिः सन्यतोत्याविति जेर्गिरादेशः स्व
रान्तानां सनीति दीर्घः **शेषात्कर्तरि परस्मैपद्।**
**सू** यत्रात्मनेपदस्य प्रसङ्गो नास्ति ततो धातोः
कर्तरि विषये परस्मैपदं भवति भवति गच्छति दीव्य
ति अत्ति जुहोति पुत्रीयति भूसत्तायां गम्लृगतौ दिवु
क्रीडाविजिगीषाव्यवहारेषु अद भक्षणे हुदानादनयोः
पुष्याद्रः वर्तमानाति अन्वि नाम्यन्तयोरिति गुणः गमि
यमोश्छ इतिछः तस्यद्वितीयवरस्यपरच्छकारः दिवादे
र्व नामिनोर्वोरिति दीर्घः अदेः अन्वि अदादेर्लुगिति ल
क अभेदाच्छिदामिति दस्य तः जुहोतेः जुहोत्यादेश्चेति
विकरणलोपः जुहोत्यादीनामिति द्विर्वे होजः नाम्यन्त
योरिति गुणः पुत्रमिच्छत्यात्मन इतिनाम्न आत्मेच्छायां यि
न् अमन्त्रस्येवन **इति लकाराणामाख्यानप्रक**
**रणोऽव्ययपादो द्वितीयः २. ओं द्विर्वचनमन**
**भ्यासस्यैकस्वरस्याद्यस्य** अधिकारोऽयम् धातोः
एकस्याद्यैकस्वरावयवस्यानभ्यासस्य कृताद्विर्वचनं।

स्य द्विर्वचनं भवतीत्यधिक्रियते चण्परोक्षाचेक्रीयितसन्
न्तेषु स्वरादीनां सार्वधातुके इति सूत्रद्वये उपतिष्ठ
ते ददरिद्रौ जजागार दरिद्राजागृगौ परोक्षा अट् टकार
आकारादट् औ इत्यर्थः चण्परोक्षेति दरिद्रस्याद्यस्यैका
स्वरस्य द्विर्वं अभ्यासस्यादिव्यञ्जनमवशेष्यम् आका
राद्दटौ सन्ध्यक्षरे चेत्यालोपः जागर्ति जागृ परोक्षा अ
ट् चण्परोक्षेति जागृ द्विर्वं अनादिव्यञ्जनलोपः ऋ लृ
अस्योपधेति वृद्धिः इयाय इण गतौ परोक्षा अट् चण्प
रोक्षेति द्विर्वं धातोरस्योपधेति वृद्धिः अभ्यासस्यासवर्णे
इति इकारस्य इयादेशः पश्चात् **स्वरादेर्द्वितीयस्य**

स्वरादेर्धातोर्द्वितीयस्यैकस्वरस्यावयवस्य द्विर्वचनं
भवति अटिटिषति अशिशिषति अट पट गतौ अश
भोजने अटितुमिच्छति अशितुमिच्छति सन् इडाग
मोऽसार्वधातुकस्यादिव्यञ्जनादेरिति इट् अनेनाटि शिष्ये
तयोर्द्विर्वं आटिटत् आशिशत् अटतेराश्नुक्तः अश्नुते
राश्नुतः धातोश्चङ्नादेवेति इन् अस्योपधेति दीर्घः अद्य
दि अद्यतनादिः श्रिद्रुस्रुकमिकारितान्तेभ्यश्चङ्कर्तरी
ति चङ् चण्परोक्षेति टिधि इत्येतयोर्द्विर्वं पश्चात्कारि
तलोपः अटाट्यते अशाशप्यते अट पट गतौ अशूङ् व्याप्तौ
कुटिलमटति अर्थमश्नुते सूचिसूत्रिमूत्र्यट्यर्त्यशू
र्णुतीन् इति यङाहुः अस्य च यङ इति लोपे द्वितीयस्यैक
स्वरस्य च यङ इति द्विर्वं अनादिव्यञ्जनलोपः दीर्घोना
गमान्तस्येति दीर्घः अनभ्यासस्येति किम् अटाटिषति

ऊटिलमटितुमिच्छति यथाहुः अटाट्यशाट्यास्सन् ३६ अ
स्यचलोपः यस्मान्नलोपाऽतो रितियलोपः अनद्विर्वचनं
नभवति एकस्वरस्येतिकिम् आट परोक्षा अट् अत्र
द्वितीयस्यैकस्वरत्वमस्वरत्वान्नास्ति अस्योपधेतिदी
र्घः अस्यादेःसर्वत्रेतिदीर्घः दीर्घोन्त्यस्वरलोपः नन्दब
द्राःसंयोगादयोऽन्ये स्वरादेर्यातोद्वितीयस्यैक
स्वरस्य यःसंयोगस्तस्यादयो येनकारबकारदकाररे
फा स्ते नद्विरुच्यन्ते तान्वर्जयित्वाधिपस्याद्विर्वचनंभ
वतीत्यर्थः अयेयकारेनबदराद्विरुच्यन्तेएव अजिजि
षति उन्दिदिषति उज्जिजिषति अड्डिडिषति अर्चिचिष
ति अत्र अञ्जिकिलत्रशागातिषु उकारःस्वरातिस्तृतिसू
यतीतीड्विकल्पार्थः उन्दीक्लेदने उज्झआर्जवे अड्डअ
भियोगे अर्चपूजायाम् अजितुमिच्छति उन्दितुम् उ
ज्झितुम् अड्डितुम् अर्चितुम् सन् ३६ नबदरवर्जे पूर्वोक्ता
द्वितीयस्यैकस्वरस्यजिदिजिडिचिइत्यस्य चाल्परोक्षेति द्वि
र्वे तवर्गस्यटवर्गयोगेचटवर्गोवितिदस्यडः वर्गेवर्गा
न्तइतिनस्यनः आजिजत् औन्दिदत् औज्झिजत् आड्डिडत्
आर्चिचत् अञ्जनं शाप्तल उन्दनं उज्झनं अड्डनम् अ
र्चनम् इत्यादि अद्यान्तादिः स्विडस्ककामिकारिता।
न्तेभ्यश्चाल्पतरीति वा ए स्वरादीनां वृद्धिरादेः अवर्णा।
स्याकारः आदैत्य जि दि जि डि चि इत्यस्याद्विर्वे अस्याकारि
नलोपः नबदराइतिकिम् ईर्चिचिषते ईर्लदधानात्कं।
नयोः ईर्चितुमिच्छति सन् ३६ तिाद्वित्वे अनादिव्यञ्ज

नलोपः कवर्गस्यचवर्गः अयेइतिकिम् अयार्यते ऋगति
प्रापणयोः कुटिलमृच्छति सृपिसृपिइतियङ्ग्राह्यः चेकी
यितेचेतियणः चणपरोक्षेतियङ्द्विर्व अत्ररेफोनवर्जते ।
अनादिव्यञ्जनलोपः दीर्घोनागमान्तस्येतिदीर्घः पू
र्वोभ्यासः धातोर्द्विर्वचनेकृतेयःपूर्वोभागःसोभ्यास
संज्ञोभवति पपाच पपाठ पच् पठ परोक्षा अट् द्वि
र्वे अभ्याससंज्ञायांसत्यांअभ्यासस्यादिव्यञ्जनमव
शेष्यम् असंयोगेपधेतिदीर्घः शिश्राय उद्राव श्रिञ् से
वायां द्रुगतौ अट् श्रि द्रु द्विर्वे अनादिव्यञ्जनलोपः
असंयोगेपधेतिवृद्धिः अभ्याससंज्ञयाकश्योजनम् अ
भ्यासस्यादिव्यञ्जनमवशेष्यमित्यादिषु द्वयमा
भ्यस्तम् धातोर्द्विर्वचनेकृतेयद्द्वयंधात्वभ्यासौ ।
तदभ्यस्तसंज्ञंभवति ददति ददत् दधति दधत् डु
दाञ्दाने डुधाञ् दानधारणयोः वर्तमाना अन्ति प
ञ्चमी अन्तु अन्ति जुहोत्यादेश्चेतिलुक् जुहोत्यादीनां
सार्वधातुकेइतिद्विर्वचनम् द्वितीयचतुर्थयोः प्रथ
मतृतीयावितिधस्यदः अभ्यस्तसंज्ञायांसत्याम् अ
भ्यस्तानामाकारस्यलोपः लोपोभ्यस्तादन्तिनइ
तिनलोपः जोहूयते ह्वेञ्स्पर्धायांशब्देच सम्प्रसारणा
न्तानामित्येकारस्याकारः अत्यर्थंह्वयति धातोरेकस्व
राद्यङ्ग्राह्यइतियङ्ग्राह्यः द्विर्वे अभ्यस्तस्यचेतिह्वयोर्योरभ्या
सयोः संप्रसारणमुकारः गुणश्चेक्रीयितेइतिगु
णः नाम्यन्तानांयस्माधीतिदीर्घः जक्षादिश्च

जक्षादिगणः अकृतद्विर्वचनोपि अभ्यस्तसंज्ञो भवति ।
जक्ष भक्षहसनयोः जागृ निद्राक्षये दरिद्रा दुर्गतौ चका
सृ दीप्तौ शासु अनुशिष्टौ जक्षादेः जक्षति जाग्रति ।
दरिद्रति चकासति शासति वर्त्तमाना अन्ति अन्ति ल
क् लोपोऽभ्यस्तादन्तिनः इति नलोपः दरिद्रातेरभ्यस्ताना
माकारस्यात्यालोपः अभ्यस्तसंज्ञायाः प्रयोजनम् अ
भ्यस्तानामाकारस्येत्यादिषु **चण्परोक्षाचेक्रीयि
तसनन्तेषु** चणि परोक्षायां चेक्रीयितान्तस्य ।
सनन्तस्य च समुदायस्य द्विर्वचनं भवति चणि तावत् ।
अपीपचत् अपीपठत् पच् पठ् पचन्ते णिक् पचने ।
धातोरस्वेनोश्चेति इन् अस्योपधे इति दीर्घः अद्यादि अद्यतना
दिः ङिड्रु कमि कारितान्ते भ्यश्च एकवर्णेति चणि का
रितलोपः इति कृते स्यादिविधिरिति वचनाद्धेन पच् पठ्
द्विर्वे अभ्यासस्यादिव्यञ्जनमवशेष्यम् इत्यसमानलो
पोपधाया ह्रस्वमणीति धातोर्ह्रस्वः अलोपे समानस्य
सन्वल्लघुनि चण्परे इत्यभ्यासस्येत्वम् नसधीर्घो ल
घोरिति दीर्घः परोक्षायाम् चकार पपाच पपाठ क्र
म् पच पठ परोक्षा अट् अनादिव्यञ्जनलोपः अकार ।
ऋवर्णस्य कवर्गस्य चवर्गः अस्योपधेति वृद्धिर्दीर्घो
चेक्रीयितान्तस्य चेक्रीयते जेक्रीयते देध्मीयते पेपीया
ते अरार्यते कृञ् ज्ञा गम्लृ यो माङ् दाने ध्मा षा ह्वामि संयोगा
देः पापायते ऋ गतौ गुणार्थं करोति जिहीर्षति यजतिरि
वति ऋटिल इयर्ति धातोरेकस्वरादव्यञ्जनाद्येक्रीयितं ।

मिमीय आहुः इयर्तेः स्मृचि स्मृ ईति यमाहुः कृञ्जस्तन ई
दन्तश्रेणी कीर्तयत्स्वायीति ईकारः प्राप्योरीति आकार
स्येकारः चिनोतेः दाम्नागायतीति ईकारः इयर्तेः चे
कीर्तयते चेति धातोर्गुणः चे कीर्तितान्तं सम्पाद्य अनेन।
कीर्ती पकी पीये द्वित्वे अमादि व्यञ्जनलोपः गुणाश्चेकी
यिते इत्याभ्यासस्य गुणः द्वितीय चतुर्थयोः प्रथम तृ
तीयाविति छस्य गुणः प्रस्फदः कवर्गस्य चवर्ग इति कस्य
चः गस्य जः इयर्तेः ये इत्यस्यानादि व्यञ्जनलोपः दी
र्घोना गमान्तस्येति दीर्घः सन्नन्तस्य इतीप्सति आ
अटिटिषति अरिरिषति इत्यादौ अति पूर्वः णकार
इणो गा इत्यर्थः अटपद्गतौ ऋगति प्रापणयोः प
र्यन्तमिच्छति अटिते अर्ति मिति वा को कृतेः धातोर्वी
कर्मणस्तत्समन्तादिति सन् इणः इवर्ण दम्भिश्रिडीपी
इइति इडभावः अटेः इडागमा सार्वधातुकस्येति इट्
स्वच्छतेः ऋतो हङ्गृ न इतीड्भावे प्राप्ने स्मिपूङ्ञ्ज्वशू
कृगृद धृप्रच्छांसनीति इट् आदेशागमः ततो द्विर्वे इष
अटिष अरिष इति स्थिते अनेन षटिरि इति द्वित्वं सत्व
र्णस्येति इत्वम्

## जुहोत्यादीनां सार्वधातुके

जुहोत्यादीनां हुदानादानयोरित्यादि गणपठितानां
धातूनां सार्वधातुके परे द्विर्वचनं भवति जुहोति बि
भेति जिह्रेति हुदानादानयोः ञिभी भये ह्री लज्जायां।
वर्तमानाति अभ्यास होत्यादेशेति लुक अनेन द्विर्वङ्क
स्वः होजः द्वितीयचतुर्थयोरिति भस्य बः नाम्यन्तयो

रितिगुणः सार्वधातुकेइतिकिम् होता स्वप्तनीता
अभ्यासस्यादिव्यंजनमवशेष्यम् अभ्यासस्य
यदादिव्यंजनं तदवशेष्यंस्यादन्यम् अनादिव्यंजनंलो
प्यम् पिपठति पिपतति यजदेवतापूजासङ्गतकरण
दानेषु पचु यष्टुमिच्छति पक्तुमिच्छति सन् यजेःभ्र
ज्जादीनांषः षढोःकःसे पचेःचवर्गस्यकिः द्वित्वं अने
नचकारजकारयोर्लोपः सन्यवर्णस्येतिइत्वम् शि
ट्परोघोषः अभ्यासस्याघः अघोषःशिटःपरःसोऽवा
शेष्यःस्यात् शिट्लोपइत्यर्थः चस्कन्द चुश्चोत टि
ष्टेव तस्तम्भपस्पर्श स्कन्दिर् शोषणे श्चुतिर् क्षरणे ष्टि
वुनिरसने स्तन्भसौत्रोधातुः उकारउद्देश्यार्थः स्प
र्शसंस्पर्शे परोक्षायाम् द्वित्वमनेनकचटतपाःस्युरन्ये
शिट्व्यंजनानिलुप्यन्ते स्तम्भेःवर्णवर्गान्तइतिनस्यमः
स्कन्देः अभ्यासस्यकवर्गस्यचवर्गः द्वितीयचतुर्थयोरि
तिस्पष्टः द्वितीयचतुर्थयोःप्रथमतृतीयौ
अभ्यासस्थयोर्द्वितीयचतुर्थयोः तयोर्यथासंख्यं प्रथ
मतृतीयावादेशौभवतः चखान चिच्छेद टिष्ठेव त
स्थौ पफाल जघास जझाम डुढौके दधौ बभौ खनु
अवदारणे छिदिर् द्वैधीकरणे ष्ठिवुनिरसने ष्ठागतिनि
वृत्तौ फलादेःघःसः नाश्रित्येतिज्ञापकात् ञिफलाक
निष्पत्तौ अदभक्षणे तस्यवापरोक्षायामितिघस्लृआ
देशः झषअदने ढौकृगत्यर्थः डुधाञ् दानधारणयोः
भादीप्तौ अत्रद्वित्वे अनेन खछठथफानांकचटतपाः तु

कण्ठ्याभावे गजडदबाः क्रौकेः पचे इत्यत्र ह्रस्वादेशो इति न
त्वान्तरात् अभ्यासस्य औकारस्य उकारः **ह्रोजः** अ
भ्यासस्य योहकारस्तस्य जकारादेशो भवति जहौ ओहा
क् त्यागे ओकारो ल्वाद्यादेशबन्धेत्यर्थः ककारः ह्रःका
लचीह्योरित्यर्थः अट् द्विर्वचनेन ह्रस्वत्वः आकारादट
औ सन्ध्यक्षरेवेत्यालोपः **कवर्गस्य चवर्गः** अ
भ्यासस्य यः कवर्गस्तस्य चवर्गादेशो भवति चकार चखा
न जगाम जुहुवे हम्लृ खनु अवदारणे गम्लृ ङुङ् अव्य
क्ते शब्दे ङकारः आत्मनेपदार्थः परोक्षा एप् द्विर्वचनेन क
वर्गस्य चवर्गः ङुङः स्थाने द्वाविव वर्णौ वर्णान्तस्येव
**न कवतेश्चेक्रीयिते** कवतेः कुङ् शब्दे इत्यस्य यः अ
भ्यासस्तस्य कवर्गस्य चवर्गादेशो न भवति चेक्रीयिते
परे कोकूयते अव्यक्तं कवते धातोरेकस्वरेति यङ्प्रत्ययः।
द्विच गुणश्चेक्रीयिते इत्यभ्यासस्य गुणः नाम्यन्तानां य
स्यादौ लिप्यतो दीर्घः चेक्रीयिते इति किम् चुकूषते कु
ङ् धातोः कोतुमिच्छति धातोर्वा कर्मणः सन्नन्तादिति सन्
स्वरान्तानां सनीति दीर्घः चण्परोक्षेति द्विर्वचनं प्र
त्ययस्य चः अन्यत्पूर्ववत् **ह्रस्वः** अभ्यासस्य दीर्घ
स्य ह्रस्वो भवति ददौ निनाय ललाव डुदाञ् दाने णीञ्
प्रापणे लूञ् छेदने अट् द्विर्वचनेन ह्रस्वः दाञ् आका
रादटौ सन्ध्यक्षरेवेत्यालोपः णीलूञोरस्योपधेति वृद्धिः
गिरे श्लेषणे लीयेत उक्तौ केचिद् परिभाषते ण्वोरत्र
वर्णे पेटल्वात् क्रीडनार्थः परोक्षा अट् द्विर्वचनेन

भ्यासस्य ह्रस्वः पचइ ग्लुलादेषोऽइति तन्त्रान्तरात् एवं इत्येत।
यो स्तालव्ययो स्तालव्य इकारः ओ औ इत्येतयो रोष्ठ्ययो रोष्ठ्य उका
रः द्वितीयचतुर्थयोः इति ह्रस्वः **ऋकारः ऋवर्णस्य**
अभ्यासस्य यः ऋवर्णः ऋकार ॠकारो तस्याकारादेशो भव
ति चकार जगार चिक्लृपे इति क्लृप् ह्लृनिवारणे क्लृप् सा
मर्थ्ये अट् द्वित्वं अनेन ऋवर्णस्य अकारः क्लृपेः कल्पिवत्वमि
ष्यतिमन्त् क्लृपेरो लः इति कृतेः लकृतिः ऋकारस्य लृकारः
चलारो देतिकृत पद्वित्वं अनादिव्यञ्जनलोपः ऋकारलृका
रयोः सावर्ण्यादनेनाभ्यासस्य लृकारस्य अकारः तस्य तस्य व
र्णस्येति इत्वम् चिक्लृपे इति स्थिते वर्तमानाति अन्वि अस
म्पन्नरलोपः **दीर्घ इणः परोक्षायामगुणे** इणग
ताविस्याभ्यासस्य दीर्घो भवति परोक्षायां यः अगुणे अ
स्मिन्परस्मिन्परे ईयतुः ईयुः परोक्षा अतुस् उस स्वरविधिः
स्वरे द्विर्वचननिमित्ते कृते द्विर्वचने इत्यादौ द्वित्वं पश्चादिण
श्चेति यत्वम् अनेनाभ्यासस्य दीर्घः परोक्षायां चेति गुणा
भावः देवदत्तेन ग्रामः ईये परोक्षा पञ्चम्यात्मनेपदे **अस्या
देः सर्वत्र** अभ्यासस्य आदिरकारस्य दीर्घो भवति स
र्वस्मिन् परोक्षायां सगुणायां सगुणायां वा परतः आट आट
तुः आटुः अट गतौ अट् अतुस् उस् द्वित्वं अनादिव्य
ञ्जनलोपः अनेनाभ्यासस्य दीर्घः धातोः स्वायव इति दीर्घः
**तस्मान्नागमः परादिरन्तश्चेत्संयोगः** तस्मात्
कारात्परतो दीर्घादभ्यासादेर्नकारागमो भवति अन्त
श्चेत्संयोगः यदि धातोरन्तः संयोगो भवति आनञ्ज आन।

ञ्जतुः आनञ्जतुः आनञ्जुः आनर्च आनर्चतुः आनर्चुः अन्नाम
क्तिस्त्वरणगतिषु अर्चपूजायाम् परोक्षाअट् अतुस् उस्
द्वित्वं अनादिव्यञ्जनलोपः पूर्वेणदीर्घः तस्मादनेन नागमः
अनश्चेत्संयोगाइतिकिम् आट आटतुः आटुः **ऋकारेच**
तस्मादकारात्कृतदीर्घात् ऋकारेपरे नकारागमोभवति
आनृधतुः आनृधुः ऋधुवृद्धौ आनर्धः परोक्षा अतुस्
उस् द्वित्वं अकारऋवर्णस्य अस्यादेःसर्वत्रेतिदीर्घः अने।
ननागमः **अश्नोतेश्च** तस्मादकारात्कृतदीर्घात्परस्य।
अश्नुव्याप्तावित्यस्यादिर्नागमोभवति आनशे अश्नुव्याप्तौ।
परोक्षाएद्वित्वं अस्यादेःसर्वत्रेतिदीर्घः अनेननागमः **भ
वतेरः** भूसत्तायामित्यस्यपरोक्षायामभ्यासस्यान्त्यस्य
अकारादेशोभवति बभूव परोक्षाअट् द्वित्वं द्वितीयाच
तुर्थयोरितिभस्यबः अनेनऊकारस्यअकारः भुवोवोन्तर
तिवकारागमः परोक्षायामितिकिम् बुभूषति भवितुमि
च्छति सन् उवर्णात्पादिभ्यश्चेतिइडभावः **निजिविजि
विषांगुणःसार्वधातुके** णिजिर् शौचपोषणयोः
विजिर्पृथग्भावे विष्लृव्याप्तौ एषामभ्यासस्यगुणोभवति
सार्वधातुकेपरे नेनेक्ति नेनिज्यात् नेनेक्तु अनेनक् वे
वेक्ति वेविज्यात् वेवेक्तु अवेवेक् वेवेष्टि वेविष्यात् वेवेष्टु
अवेवेट् वर्तमानाति सप्तमीयात् पञ्चमीतु ह्यस्तनीदि।
ह्यस्तन्यामडागमादिः अन्विजुहोत्यादेश्चेतिश्लुः जुहोत्यादीनां
सार्वधातुकेइतिद्वित्वं अनेनाभ्यासस्यगुणः धातोरूपधायागुणः
यात्प्रत्ययेसप्तम्यांचेतिगुणाभावः व्यञ्जनाद्दिस्योरितिदिलोपः

विधेस्तवर्गस्यष्टेतिनस्यात्ः छेशाषच्छेतिष स्याज्ञत्वम् वावि
रामेश्वमितु स्यात्ः निजिविज्योःश्लुटि चवर्गस्यकिरसवर्णोइ
तिकत्वम् सार्वधातुकेइतिकिम् निनेक्त विवेक्त विवेष
भृञामित् डुभृञ्धारणपोषणयोः ओहा
ङ्गतौ माङ्माने एषामभ्यासस्यान्तस्यइत्वंभवति सा
र्वधातुकेपरे बिभर्ति बिभृयात् बिभर्तु अबिभः ति या
त् तु दि लस्त्वामङ्गान्वादिः अन्वि ऋदोत्यादेश्चेतिक्वा
कृ ऋदोत्यादीनामितिद्विर्वं गुणोहयस्त्वयोश्च अकारस्ह
वर्णस्य अनेनइत्वम् गुणःसम्प्रयोश्चेतिगुणाभावः व्यञ्ज
नादिस्यात्तितिदिलोपः रेफस्यविसर्जनीयः जिहीते जि
हीत जिहीताम् अजिहीत मिमीते मिमीत मिमीताम्
अमिमीत ङानुबन्धत्वादात्मनेपदम् वर्तते सम्म ईन
पञ्चतनाम् लस्त तं ईतप्रत्यये अभ्यस्तानामाकारस्येइ
त्यालोपः अन्यत्र उभयेषामीकारोव्यञ्जनादावदइतिईका
रः सार्वधातुकेइतिकिम् बभारजहे ममे अट् ए मन्त
तरेवेत्यालोपः **अर्तिपिपर्त्योश्च** ऋसृगतौ पृपाल
नपूरणयोः इत्येतयोरभ्यासस्यसार्वधातुकेपरेइत्वंभवति
इयर्ति ॥ इयृयात् इयर्तु ऐयः ति यात् तु दि अन्वि
ऋदोत्यादेश्चेतिक्वक ऋदोत्यादीनामितिद्विर्वं अनेनाभ्या
सस्यइत्वम् अभ्यासस्यासवर्णेइतिइय् हस्तव्यामकारस्ह
वर्णस्येतिऋकारस्याकारः तस्यानेनइत्वम् स्वरादीनांवृ
द्धिरादेरित्यनेनवृद्धिः इकारस्यैकारः नामिनयोर्वितिगुणः व्यञ्ज
नादिस्यात्तितिदिलोपः तस्यविसर्जनीयः सम्प्रयोश्चेतिगुणाभावः सि

पर्ति पिपूर्षात् पिपर्त्ते अपिपः सन्भ्यां उरोष्ठ्योपधस्य चेत्यु
र् तस्य नामिनो र्वोरिति दीर्घः सार्वधातुके इति किम् आ
रपधाय पपोस्तायट्वृद्धिः **सन्यवर्णस्य** सन्निमित्ते यो
भ्यासस्तस्यावर्णस्य इत्वं भवति पिपक्षति यियक्षति पच
यज पक्तुमिच्छति यष्टुमिच्छति धातोर्वेति सन् चपयो
द्वे इति द्वित्वं अनादिव्यञ्जनलोपः अनेनाभ्यासस्य इत्वम्
चवर्गस्य किः षत्वम् वर्तमाना ति अन्ति अ सन्प्रत्ययलोपः
यजेः स्कृजादीनां षः तस्य षढोः कः से इति कः अवर्णस्ये
ति किम् बुभूषति सन्निमित्तस्येति किम् पापचिषते अ
त्यर्थं पक्तुमिच्छति इति यपावः द्वित्वं दीर्घोऽनागमान्तस्येति
दीर्घः पुनः सन् इट् अस्य च लोपः यस्यानन्यथालोरिति य
लोपः **उवर्णस्य जान्तस्थापवर्गपरस्यावर्णे**
सन्निमित्तस्याभ्यासस्य उवर्णान्तस्य जान्तस्थापवर्गपरस्य
इत्वं भवति तेजान्तस्थापवर्गा यदि अवर्णपरे भवन्ति जिजा
वयिषति यियावयिषति रिरावयिषति लिलावयिषति ।
पिपावयिषति बिभावयिषति मिमावयिषति जुङ् सौत्रो
धातुः युमिश्रणे रुघाद्वे लूञ् छेदने पूङ् पवने भू सत्ता
यां मूञ् बन्धने जवमाने प्रयोक्तुमिच्छति एवं युवन्तं ।
रुवन्तं लवन्तं पुवन्तं भवन्तं मवमानं धातोश्चद्वेनाविति
इन् वृद्धिः सन् इट् इनिक्तं स्यानिवदिति ञ्न युक लूयू ।
भूभू द्वित्वं अनेन उवर्णस्य इत्वम् **गुणश्चक्रीयिते**
चेक्रीयितपरे अभ्यासस्य नामिनो गुणो भवति चेचीयते ।
लोलूयते चिञ् चये लूञ् छेदने अत्यर्थं चिनोति लुनाति ॥

यथाहुः द्वित्वे अनेनाभ्यासस्य गुणः नामन्तानां यस्यायीति
दीर्घः **दीर्घोऽनागमान्तस्य** यस्याभ्यासस्यागमोऽन्ते ।
नास्ति तस्य दीर्घो भवति चेक्रीयिते परे पापच्यते पापठ्यते
अनागमान्तस्येति किम् यंयम्यते यम उपरमे अत्यर्थं य
च्छति यथाहुः द्वित्वे अतोऽन्तोऽनुस्वारोऽनुनासिकेति अनुस्वा
रागमः **वञ्चिस्रंसिध्वंसिभ्रंशिकसिपतिपा**
**दिस्कन्दामन्तोनी** वञ्चु गत्यर्थः स्रंसु ध्वंसु भ्रंसु अ
वस्रंसने कस गतौ पत्लृ गतौ पद गतौ स्कन्दिर् शोष।
णे एषामभ्यासस्य नी आगमो भवति चेक्रीयिते परे वनी
वच्यते सनीस्रस्यते दनीध्वस्यते बनीभ्रश्यते चनीकस्य
ते पनीपत्यते पनीपद्यते चनीस्कद्यते अत्यर्थं वञ्चति ।
स्रंसते ध्वंसते भ्रंशते कसति पतति पद्यते स्कन्दति य
थाहुः अनिदन्तबन्धेत्यत्र ङकारलोपः **अतोऽन्तोऽनुस्वारो**
**ऽनुनासिकान्तस्य** अनुनासिकान्तस्य धातोर्योऽभ्यासस्त
स्य अतः अकारान्तस्यानुस्वारागमो भवति चेक्रीयिते परे ।
बम्भण्यते तन्तन्यते चङ्क्रम्यते भण भाषार्थः तनु विस्तारे
क्रमु पदविक्षेपे अत्यर्थं भणति तनोति कुटिलं क्रामति य
थाहुः द्वित्वे अभ्यासकार्यं च अनेनानुस्वारागमः तस्य व
र्गे वर्गान्तः **जपादीनां च** जप मानसे जभ जृभि जभी
गात्रविनामे दह भस्मीकरणे दन्श दशने भञ्जो आमर्दने
पश गतौ पतेजपादयः एषामभ्यासस्यानुस्वारागमो भ
वति चेक्रीयिते परे जञ्जप्यते जञ्जभ्यते दन्दह्यते दन्द
श्यते बम्भज्यते पम्पश्यते गर्हितं जपति जभते दहति ।

दधाति भजति पसाति यथाहुः अनेनाभ्यासस्यान्तस्वारः द
न्तिभन्नेपाः अनिदन्तबन्धेतिनलोपः **चरफलोश्च उत्प**
**रस्यातः** चरगत्यर्थः फलनिष्पत्तौ अनयोरभ्यासस्य
चेक्रीयितेपरे अनुस्वारागमोभवति अभ्यासात्परस्याका
रस्योत्वञ्चभवति चञ्चूर्यते पम्फुल्यते गर्हितंचरति स्व
यमदचरति यथाहुः अत्यर्थंफलतियथाहुः अनेनाभ्या
सस्यानुस्वारागमः अकारस्यचउत्वम् चरेःनामिनोर्वो
रितिदीर्घः चर्वेवर्णागमः **ऋमतोरी** ऋकारवतोभ्या
सस्यचेक्रीयितेपरे रीआगमोभवति नरीनृत्यते दरीह
श्यते चरीकृष्यते नृतीगात्रविक्षेपे दृशिर् प्रेक्षणे कृष
सामर्थ्ये अत्यर्थंनृत्यति पश्यति कल्पतेयथाहुः अनेन
रीआगमः अकारऋवर्णस्य कृपेरोलः इतिरस्यलः ।
ऋकारस्यचलृकारः **रिरीफौचलुकि** चेक्रीयितस्यलु
किसति ऋमतोभ्यासस्य रीआगमोभवति रिरीफौच नृ
रीनर्त्ति नरिनर्त्ति नर्नर्त्ति नृत्त अत्यर्थंनृत्यति यथाहुःना
स्याचेक्रीयितस्येतिलुक् अनेनरिरीफागमः **अलोपे**
**समानस्यसन्वल्लघुनिचङ्परे** समानस्यसमा
नसंज्ञकस्यालोपेलोपाभावेसति अभ्यासस्यलघुधा
र्गस्य घटे तितस्पटः अनिदनुबन्धानामिति किम् वन्द्यते व
दि अभिवादनस्तुत्योः इकारो नकारागमार्थः अगुणे इति किम्
स्रंसिता ध्वंसिता भ्रंशिता **नशाह्वाद्विकरणात्** अनि
दनुबन्धेति निवृत्तम् नशाह्वाश्च विकरणात्परस्यानुषङ्गस्य
लोपो भवति हिनस्ति हिंस्तः हिंसन्ति भनक्ति भङ्क्तः भञ्जन्ति
तृहि हिसि हिंसायाम् इकारो नकारागमार्थः भञ्जो आमर्दने
तितस् अन्तिस्वराद्धादेः परो न धाह्वः अनेनानुषङ्गलोपः द्वित्व
बहुत्वयोः श्नधादेर्विकरणात्त लोपः मनोरनुस्वारः भञ्जेश्चव
र्गस्य किःधुटि वर्गे वर्गान्तः विकरणादिति किम् नन्दति टुन
दि समृद्धौ अनिदनुबन्धानामिति ज्ञापकान्नकारागमः
**परोक्षायामिन्धिश्रन्थिग्रन्थिदम्भीनामगुणे** ञिइ
न्धी दीप्तौ श्रन्थग्रन्थसन्दर्भे दम्भु दम्भे एषां अगुणायां परो
क्षायां परस्यामनुषङ्गलोपो भवति समीधे इन्धु संपूर्वः परो
क्षाए अनेनानुषङ्गः लोपः द्वित्वे श्रेथतुः श्रेथुः ग्रेथतुः ग्रेथुः

देभतुः देभुः श्नथ् ग्रथ् हिंवे लफलभजत्रपश्रन्थग्रन्थदम्भी
नामेत्वेत्वाभ्यासलोपौ अनुषङ्गलोपः **थलि च** श्रन्थादीना
मनुषङ्गलोपो भवति थलिपरे श्रेथिथ ग्रेथिथ देभिथ पूर्व
वदेत्वाभ्यासलोपौ अनेन नलोपः **दंशिसञ्जिस्वञ्जिर
ञ्जीनामनि** दंशदशने षञ्जसङ्गे रञ्जरागे एषामनिपरे
अनुषङ्गलोपो भवति दशति सजति रजति अनीति किम् दं
शः सङ्गः परिषङ्गः भावे घञ् रज्यतेऽस्मिन्निति रङ्गः अकर्तरि
च कारके संज्ञायामित्यधिकरणे घञ् **अस्योपधाया दी
र्घो वृद्धिर्नामिनामिनिचट्सु** उपधाभूतस्याकारस्य
दीर्घो भवति नामिनां चान्तभूतानां वृद्धिर्भवति इनि इचि अ
टि परे पाचयति पाठयति चाययति नाययति यावयति भा
वयति कारयति तारयति पच् पठ् चिञ् चयेणीञ् प्रापणे
णोनः युमिश्रणे भूसत्तायाम् डुकृञ्करणे तॄप्लवनतरण
योः पचन्तं प्रयुङ्क्ते पचं पठन्तं चिन्वन्तं नयन्तं यवन्तं भवन्तं
कुर्वन्तं तरन्तं इति वाक्ये कृते धातोश्च हेतावितीन् अनेनो
पधाया अकारस्य नामिनां च वृद्धिः इति अन्विग्रणाः इचि यथा
अपाचि अपाठि अचायि अनायि अयावि अभावि अकारि अ
तारि अद्यतनी त भावकर्मणोश्चेति इच् अनेन दीर्घवृद्धी इच
स्लोप इति तकारस्य लोपः अटि पपाच पपाठ चिचाय निनाय
लुलाव ललाव चकार ततार कृञ् लूञ् छेदने उत्तमैकव
चने अटि वृद्धिदीर्घौ वा भवतः णल् उत्तमो वेति तन्त्रान्तरात् अट्
पपाच पपच चिचाय वा चिचय निनाय निनय **सिचि परस्मै
स्वरान्तानाम्** स्वरान्तानां धातूनां सिचि परस्मैपदे परे अ

न्त्यस्य वृद्धिर्भवति अचैषीत् अनैषीत् अद्रौषीत् अकार्षीत्
अयादि सिच् सिच इति ईट् वृद्धिः अड्डात्वादि अनेन वृद्धिः से
टयपि सिचि वृद्धिर्भवति अतारीत् अलावीत् तॄ प्लवनतरण
योः लूञ् छेदने अयादि अड्डात्वादिः सिच् इट् ईट् इटईटी
ति सिज्लोपः अनेन वृद्धिः परस्मा इति किम् अचेष्ट चिञ् चये
अयत सिच् गुणः निमित्तात्प्रत्ययेत्वषः तवर्गस्य षटवर्गादि
ति तस्य टः स्वरान्तानामिति किम् अकोषीत् कुष निष्कर्षे अ
अयादि सिच् इट् ईट् इटईटीति सिज्लोपः उपधागुणः **अ
ञ्जनान्तानामनिटाम्** अञ्जनान्तानां धातूनामनिटा
मिड्हीनानां सिचि परस्मैपदे परे नामिनो वृद्धिर्भवति अभै
त्सीत् अरौत्सीत् भिदिर् विदारणे रुधिर् आवरणे दिसिच् ई
ट् अनेन वृद्धिः त्वदिचदिभिदीति इडभावः अघोषेप्रथमोशिटामि
ति दस्य तः अनिटामिति किम् अकोषीत् अस्य च दीर्घः अञ्जना
न्तानामनिटां धातूनां सिचि परस्मैपदे परे अकारस्य दीर्घो भव
ति अपाक्षीत् अभाङ्क्षीत् पच् भञ्जो आमर्दने अयादि सिच् ई
ट् अनेनाकारस्य दीर्घः चवर्गस्य किः वर्गे वर्गान्तः षत्वम् अनि
टामिति किम् अरक्षीत् **सेटो वा** सेटो धातोरकारस्य वा दी
र्घो भवति सिचि परस्मैपदे परे अकणीत् अकाणीत् अरणीत्
अराणीत् कण रण शब्दे अस्येति किम् अदेवीत् दिवु क्रीडादौ
अयादि सिच् इट् ईट् उपधागुणः **वदव्रजरलन्तानां च**
वद व्यक्तायां वाचि व्रज गतौ अनयोः तथा रेफान्तानां लकारा
न्तानां च धातूनां अकारस्य दीर्घो भवति सिचि परस्मैपदे परे
अवादीत् अव्राजीत् अत्सारीत् अफालीत् वद व्यक्तायां वाचि

ज्जगतौ स्खलगतौ फलनिष्पत्तौ अस्येतिकिम् अहासीत् अखो
रीत् खरखुरविलेखने उपधागुणः **क्षिजाग्योर्गुणः** टुओश्वि
गतिवृद्ध्योः जागृनिद्राक्षये अनयोः सिचिपरस्मैपदेपरेगुणोभव
ति सिचिपरस्मा इतिवृद्धिः प्राप्ता अश्वयीत् अजागरीत् अयदि
सिच् इट् ईट् अनेनगुणः इटईटीतिसिज्लोपः **ऊर्णोर्नेवा**
ऊर्णुञ् छादने इत्यस्य सिचिपरस्मा इतिवृद्धिः पक्षेनेनगुणः और्णा
र्णावीत् और्णोवीत् स्वरादीनांवृद्धिरादेरित्युकारस्यवृद्धिः
**अतिसर्त्योर्वणि** ऋगतौ ऋस्रगतौ ऋगतिप्रापणयोः
स्ऋगतौ इतिवा एषामणिपरेगुणोभवति नणकारानुबन्धे
तिनिषेधः प्राप्तः आरत् असरत् दिग्घादित्वतादित्यण्
अनेनगुणः अतेर्ऋवर्णस्याकारः सर्तेः अड्डात्वादेः अतिस
र्त्योरितिकिम् अभूषत् अणीतिकिं ऋतः स्तृतः निष्ठेतिक्तः **जा
गर्तेःकारिते** जागृनिद्राक्षये इत्यस्य कारितेपरेगुणोभवति
वृद्धिःप्राप्तः जागरयति जाग्रतंप्रयुङ्क्ते इत्यर्थः कारितेइतिकिम् ज
जागार **यक्षाशिषोर्ये** जागर्तेर्यणि आशीर्यकारेचपरेगु
णोभवति नणकारानुबन्धेति आशिषिपरस्मै इतिनिषेधः प्रा
प्तः जागर्यते जागर्यात् यक्षाशिषोरितिकिम् जागृयात् स
मीयात् अग्निलकयेइतिकिम् जागारिषोऽहं उपदेशेस्वरा
नामादनपदद्वयामात्र स्याशीष्वाशिषसीत्यादाविद्वज्जावाद
स्योपधेतिवृद्धिः **परोक्षायामगुणः**

जागर्तेःपरोक्षायामगुणेप्रत्ययेपरेगुणोभवति जजागर
तुः जजागरुः जजागरे त्वयापरोक्षायांचेत्यगुणत्वम् परोक्षा
यामितिकिम् जागृतः वर्तमानातस् अगुणइतिकिम् जजा

गार **ऋतश्च संयोगादेः** संयोगादेर्ऋकारस्य परोक्षायाम
गुणो वा गुणो भवति सस्वरतुः सस्वरुः दध्वरतुः दध्वरुः सस्वरे
दध्वरे स्वृ शब्दोपतापयोः ध्वृ हूर्छने परोक्षा अतुस् उस् एद्विर्वे अकार ऋव
र्णस्य अनादिव्यञ्जनलोपः द्वितीयचतुर्थयोरिति धस्य दः अनेन गु
णः संयोगादेरितिकिम् चक्रतुः चक्रुः अगुण इति किं सस्मार दध्वार
**ऋदन्तानां च** ऋदन्तानां धातूनां परोक्षायामगुणेऽपि प्रत्यये परे
गुणो भवति विचकरतुः विचकरुः निजगरतुः निजगरुः तस्त
रतुः तस्तरुः कृ विक्षेपे गॄ निगरणे विनिपूर्वौ स्तृञ् आच्छादने
अतुस् उस् द्विर्वे अकार ऋवर्णस्य स्तृ इत्यस्य शिट्परोऽघोषः अगुण इ
तिकिम् विचकार **ऋच्छत्यॄतः** ऋच्छ इन्द्रियप्रलयमूर्तिभा
वयोरित्यस्य ऋकारस्य गुणो भवति परोक्षायां परस्मै आनर्छ
आनर्छतुः आनर्छुः अट् अतुस् उस् द्विर्वे अकार ऋवर्णस्य अ
स्यादेः सर्वत्रेति दीर्घः ऋकारे चेत्यभ्यासस्य नागमः अनेन धातु
ऋकारस्य गुणः परोक्षायामिति किम् ऋच्छति **शीङः सार्व**
**धातुके** शीङ् स्वप्ने इत्यस्य सार्वधातुके परे गुणो भवति सर्वे
भ्य आत्मने सार्वधातुके नन्तमे पञ्चम्या इति निषेधः शेते शया
ते शेरते बहुत्वे शेतेर्विदन्तेरादिरिति रेफागमः सार्वधातुके
किम् शिश्ये द्विर्वे यइवर्णस्येति इयम् **अयि ये** शीङः अन्त्य
स्य अयआदेशो भवति शय्यते शाशय्यते अत्यर्थं शेते धातोर्वे
कस्वरादित्ययङ् अनेन अयिआदेशः द्विर्वे दीर्घो नागमान्तस्ये
ति दीर्घः **आयि विच्छादन्तानाम्** आकारान्तानां धातूनाम
न्त्यस्य आयि आदेशो भवति इकार उकार ऋणयोः प्रदायि अपा
यि डुदाञ् दाने पा पाने अयन अझलादिः भावकर्मणोश्चेति र

च् इचस्तलोपः इचीतिकिम् दान्ति दाप् ल अन्ति अन्त्विल्लुक्
**शाछासाह्वाव्यावेपामिति** पोऽन्तः करणे छो
छेदने षो अन्तकर्मणि ह्वेञ् स्पर्धायां शब्दे च व्येञ् संवरणे
वेञ् तन्तुसन्ताने पा पाने पै ओवै शोषणे इतिवा पैतेर्लोन्त इ
ति लकारागमो वक्ष्यते एषामन्त्यस्य इनि परे आयित्यादेशो
भवति शाययति छाययति अवसाययति साययति ह्वाय
यति व्याययति वाययति पाययति णपन्तेप्रयुङ्क्ते एवं श्यन्तं
स्यन्तं ह्वयन्तं व्ययन्तं वयन्तम् पिबन्तं पायन्तंवा धातोश्चदे
मावितिइन् अनेनायिः इनीतिकिं ध्यानम् सर्वत्रसन्ध्यप्तता
नानामाकारः शुद्धेति शुद्द शुद्धका मनाकान्ताइत्यनादेशः
**अर्त्तिह्रीव्लीरीक्नूयीक्ष्माय्यादन्तानामन्तः पो यलो
पो गुणश्च नामिनाम्** ऋ गतिप्रापणयोः ऋ सृ गतावि
तिवा ह्री लज्जायां व्ली वरणे री गतिरेषणयोः क्नूयी शब्दे क्ष्मा
यी विधूनने एषां आकारान्तानां च धातूनां नामिनि परे पकारागमो
भवति क्नूयीक्ष्माय्योः यलोपः नामिनां च गुणो भवति अर्पयति
ह्रेपयति व्लेपयति रेपयति क्नोपयति क्ष्मापयति दापयति
धापयति ऋच्छन्तं इय तं वा प्रयुङ्क्ते जिह्रियन्तं व्लिनन्तं रियन्तं
क्नूयमानं क्ष्मायमानं ददतं दधतं इतिवा कोऽपि करोति इन् अनेन
पागमः यलोपः नामिनां च गुणः **पातेर्लोन्तः** पातेर्धातोः
न्यस्य इनि परे लकारागमो भवति पालयति पान्तं प्रयुङ्क्ते इन्
**धूञ्प्रीञोर्नः** धूञ् कम्पने प्रीञ् तर्पणे धूञ्प्रीञोर्वा अ
न्तस्य नकारागमो भवति इनि परे विधुनन्तं प्रीणन्तं प्रीयमा
णं वा प्रयुङ्क्ते इन् अनेन नागमः विधूनयति प्रीणयति

**भियःषुग्वा** ञिभीभयेइत्यस्यइनिपरेषुक् आगमोभवति वा
अन्ते भीषयति बिभ्यन्तंप्रयुङ्क्तेइन् अनेनषुक् आगमः कर्त्रा
स्वायत्तौटकितावित्यर्थः उकारउच्चारणार्थः पक्षेभाययति
ऋद्धिकया इन् वृद्धिः **स्फायेर्वादेशः** स्फायीओप्यायीवृ
द्धावित्यस्यइनिपरे अन्त्यस्यवकारादेशोभवति स्फावयति
स्फायमानंप्रयुङ्क्तेइन् अनेनयस्यवत्वं **रुहेःपोवा** रुह
बीजजन्मनीत्यस्यइनिपरे अन्त्यस्यपकारादेशोवाभवति रोप
यति रोहयति बाहुल्यात् रोहन्तंप्रयुङ्क्तेइन् उपधायागुणः अने
नवा पादेशः **शदेरगतौतः** शद्लृशातनेइत्यस्यान्त्यस्यइ
निपरे तकारादेशोभवति अगतौ गतावर्थेशादिर्यदावर्त
ते तदातकारादेशोनभवतीत्यर्थः फलानिशातयति शी
यमानंप्रयुङ्क्तेइन् अनेनदस्यतः उपधादीर्घः अगतावितिकि
म् गाःशादयति गमयतीत्यर्थः **हन्तेस्तः** हनहिंसागत्योरि
त्यस्यइनिपरे अन्त्यस्यतकारादेशोभवति घातयति घ्नन्तंप्रयुङ्क्ते
इन् अनेननस्यतः उपधादीर्घःहस्यहन्तेर्घिञिणोरितिहस्यघः
**हस्यहन्तेर्घिञिणिचोः** हन्तेःञिणिचोःपरयोःहकारस्यघ
त्वंभवति घातयति अघानि घ्नन्तंप्रयुङ्क्तेइन् अघत इच् अनेन
हस्यघः उपधादीर्घः हन्तेस्तइतिनस्यतः इचस्तलोपः **लुप्तो
पधस्यच** लुप्तोपधस्यहन्तेः यत्रास्यगमहनेत्यनेनोपधा
लोपःक्रियते तत्र हकारस्यघत्वंभवति घ्नन्ति घ्नन्त अघ्नन्
घ्नन्ति घ्नन्त अनुगमहनेत्युपधालोपः अनेनहस्यघः लुप्तोपध
स्येतिकिम् हन्ति हतः अनिड्वक पञ्चमोपधाया धुटिचागुणे
इतिउपधादीर्घः वनति तनोत्यादिअनिर्दिष्टेऽधुटिपञ्चमो

आतः इत्याकारस्य अकारः न लोपश्च **अभ्यासाच्च** अभ्यासात्पर
स्य हन्तेर्हकारस्य घत्वं भवति जघान जिघांसति हन्तुमिच्छतीति
र्थे तोर्वेति सन् हनिगमिङां सन्युपधाया इत्युपधादीर्घः नस्यम
नोऽनुस्वारः जङ्घन्यते कुटिलं हन्ति गत्यर्थात्कौटिल्ये इति यङ्
चपरोक्षेति द्वित्वं अनादिव्यञ्जनलोपः होजः अतोन्त्योनुस्वारः
अनेन घत्वम् वर्ग्ये वर्गान्तः **जेर्गिः सन्परोक्षयोः** जिजयेरस्य
स्य सनि परोक्षायां च परस्याम् गिरादेशो भवति जिगीषति जे
तुमिच्छति सन् अनेन जेर्गिः स्वरान्तानां सनीति दीर्घः द्वित्वं ह्रस्वः
कवर्गस्य चवर्गः परोक्षायां जिगाय जिग्यतुः जिग्युः अट् अत्र
स उस् जेर्गिः आदिवृद्धिः अन्यत्र इवर्णस्येति यत्वम् जिग्ये जि
ग्याते जिग्यिरे आत्मने सन्परोक्षयोरिति किम् जेजीयते अत्य
र्थं जयतीति यङ् नाम्यन्तानां यक्यायीति दीर्घः **चेः किर्वा**
चिञ्चयेऽस्य सन्परोक्षयोः परयोः किरादेशो वा भवति चिका
य चिक्यतुः चिक्युः चिचाय चिच्यतुः चिच्युः चिकीषति चिचीष
ति चेतुमिच्छति सन् स्वरान्तानां सनीति दीर्घः द्वित्वं सन्परोक्ष
योरिति किम् चेचीयते अत्यर्थं चिनोति यङ् नाम्यन्तानां य
क्यायीति दीर्घः **सणोऽलोपः स्वरेऽद्गुणे** सण्प्रत्ययस्य गु
णवर्जिते स्वरे परे अकारलोपो भवति अधुक्षाताम् त्वया अ
धुक्षि दुह प्रपूरणे दुह प्रपूरणे अद्यतनी ताम् इसासनिटः
शिडन्तान्मुपधादहशा इति सण् ढकेदादेर्घः तृतीयादेर्घ
ढधभान्तस्य धातोरादिचतुर्थत्वं स्ध्वोरिति दस्य धः षढोःकः
से इति कः अघोषेऽशिटां प्रथम इति गस्य कः षत्वम् अव
द्गुणे इति किम् अधुक्षन्त **दरिद्रातेरसार्वधातुके** दरि

ल क्षमत्र कुड़ो।।



द्राकुगंतादित्यस्य अन्तलोपोभवति असार्वधातुकेपरे द
रिद्र्यते दरिद्र्येत दरिद्र्यन्ते बहुलंवेअसत्यपतरलोपः असा
र्वधातुकेकिम् दरिद्राति अन्विलक **अस्थिसक्थ्योरुदि**
डोत्रस्छेदनेटुमस्जोशुद्धौ अनयोरन्तलोपोभवति धुटिप
रे भ्रष्टा भ्रक्ष्यति अभ्रक्ष्यत् नास्यतिस्यत् अनेनान्तलोपःक्षु
धोभ्रंतिधः तवर्गस्य षटेतितस्यटः घटोऽकःसे मङ्क्ता मङ्क्ष्यति
अमङ्क्ष्यत् मस्जिनशोर्धुटीतिनागमः भटोन्तृतीयइतिस्थान
सावर्ण्यात्सस्यदः तवर्गस्तृटवर्गइतिदस्यजः अनेनान्त्यजकार
स्यलोपः चवर्गस्यकिः वर्गेवर्गान्त इतिनस्यङः धुटीतिकिम्
भृज्जति मज्जति यहिज्यादिसंप्रसारणम् **यत्योकारस्य**
ओकारस्ययनिपरेलोपोभवति श्यति स्यति छ्यति घ्यति दो
व अवखण्डने षोअन्तकर्मणि धात्वादेःषःसः छोछेदने शो
तनूकरणे दिवादेर्यन् नकारइद्धार्थः अनेनओकारस्यलो
पः **आकारस्योसि** धातोराकारस्यलोपोभवति उसि
परे अदुः अमुः याप्रापणे रादाने लाआदाने ख्यातनी अन्
अविलक् अनउस् अनेनालोपः उसीतिकिम् यान्ति **स**
**न्यपरेच** सन्यपरेपरेआकारस्यलोपोभवति गेगाङ्ग
तौ वर्तमानाआत्मनेपदउत्तमपुरुषैकवचनंए आन्वि त
स्यदीर्घोन्त्यलोपः अनेनआलोपः ज्यातिरे ज्यातिले रादाने
लाआदाने ज्यातिहूवौ वरीप अन्विलक् अनेनआलोपः क
र्मव्यतिहारे आत्मनेपदम् **असेर्धा** असभुवीत्यस्यसोऽसिध्र
धयेपरे अस्तलोपोभवति आसि वर्तासि अन्विलङ् अनेना
न्त्यसकारस्यलोपःसोऽइतिइकारउच्चारणार्थः ज्यतिसे अस्

वर्तेसे कर्मव्यतिहारे आत्मनेपदम् व्यतिपूर्वः अस्त्विस्थकु अस्ते
रादेः अकारलोपः अनेनसलोपः दीधीवेव्योरिवर्णय
कारयोः दीधीङ् दीप्तिदेवनयोः वेवीङ् वीतिनातुल्येऽन्ये
नयोः इवर्णयकारयोः परयोः अन्त्यलोपोभवति आदेधिता
आदेधीत आदेधि आवेविता आवेवीत आवेवि सप्तमीआ
त्मनेपदेना इङ् सप्तमीईत आदीत नी न इच् अनेनान्त्यलोपः
आदेध्यते आवेव्यते इवर्णयकारयोरितिकिम् आदीध्यकः
आवेव्यकः दीधीवेव्योश्चेतिगुणवृद्ध्यभावः यत्वम् अस
न्ध्यक्षरयोरस्यतेनलोपश्च अकारस्यअकारसन्ध्यक्ष
रेभवतः परयोरलोपः अकारेपरेऽकारः सन्ध्यक्षरेपरेसन्ध्य
क्षरं भवति पचन्ति पचेवर्तमाना अन्ति ए अन्ति अस्येति
किम् यान्ति नाम्निव्यञ्जनान्ताद्यस्यादेः नाम्नोव्यञ्ज
नान्ताल्लिङ्गात्परस्यआद्येः आदिलोपोभवति अग्नीयते पट्
यते अग्निरिवाचरति पटुरिवाचरति कर्तर्याधिःसलोपश्चेत्या
धिः अनेनाद्येरादिलोपः नाम्यन्तानामितिदीर्घः रैयते वाच्य
ते विद्युत्यते विदस्यते नाम्निव्यञ्जनान्तादितिकिम् श्येनाय
ते गमहनजनखनघसामुपधायाःस्वरादा
वनण्यपरोक्षे गम्लृगतौ हनहिंसागत्योः जनजनने ज
नीप्रादुर्भावेइतिवाखनुअवदारणे अदेर्घस्लृ एषामुपधाया
लोपोभवति अणप्रत्ययवर्जिते अतोस्वरादौप्रत्ययेपरे जग्म
तुः जग्मुः जघ्नतुः जघ्नुः जज्ञतुः जज्ञुः जज्ञे जज्ञाते जज्ञिरे
चख्नतुः चख्नुः जक्षतुः जक्षुः अतस् उस् अनेनोपधालोपः
हन्तेर्घश्चोपधस्येतिहस्यघः जनजननेइत्यस्यपरस्मैपदम् ज

नीशाङ्भ्यांवेइत्यस्मात्मनेपदम् तवर्गश्चटेतितस्यजः ग्रदेः वापरो
तायामिति चस्लृश्रादेशः शासिवासिघसीनांचेतिसस्यषः श्र
घोषेष्वशिटामितिचस्यकः स्वरादावितिकिं गम्यते श्रनणी
तिकिम् श्रगमत् श्रघसत् श्रदेर्घस्लृसनद्यतन्योरितिघस्ल्
पुषादिस्त्रेणाण् श्रघ्रताइतिकिम् गमनम् **कारितस्या**
**नामिद्विकरणे** कारितस्यलोपोभवति श्रनामिद्विकरणे
श्राम्इट्द्विकरणवर्जितेप्रत्ययेपरे कारणा हारणाकुर्वतः
प्रयुक्तिः हरतःइन् वृद्धिः उधिस्त्र्यासिद्धटिवान्दिकारिता
न्तेभ्योऽः युवुफामनाकान्ताइत्यनादेशाः श्रनेनकारितलो
पः स्त्रियामादाप् कार्यते हार्यते कुर्वन्प्रयुज्यते हृञ् इन्
वृद्धिः ते सार्वधातुकेयण् कारितलोपः श्रनामिद्विकरणेइ
तिकिम् कारयांचकार कुर्वन्तं ; प्रयुयोज इन् दीर्घः
चकास्कासित्याम् श्रामःकृञ् कारयिता पाचयिता कुर्वन्तं
प्रयोक्ता पचन्तंइन् वृद्धिः श्रस्तता इट् कारयति पाचयति
कुर्वन्तंप्रयुङ्क्ते पचन्तं इन् वृद्धिदीर्घौ ति श्रन्वि सर्वत्रकारि
तस्यश्रुताः **यस्यापत्यस्यास्वरपूर्वस्याधिनायीषु**
श्रापत्यस्यापत्यार्थेविहितस्यास्वरपूर्वस्यस्वरः पूर्वोयस्यनास्ति
तथाविधस्ययकारस्याधिनिश्रायौ ईप्रत्ययेचपरेलोपोभवति
गार्गीयति गार्गायते गार्गी गर्गादेर्यणितियणः णकारोवृद्धि
यदेशःसलोइत्यर्थः श्रादिवृद्धिः इवर्णावर्णयोस्वरेयेप्रत्ययेचेत्यलो
पः गार्गीमिच्छत्यात्मनः गार्ग्यइवाचरति नाम्नश्रात्मेच्छायामि
तियिन् कर्त्तरायिः यिन्यवर्णस्येतिईत्वम् पूर्वाचार्यवृत्यापूर्वस्य
यकारस्यलोपः गार्गीत्यत्रणयादितिईप्रत्ययः ईकारेस्त्रीकृते।

त्रोप्यः अनेनयलोपः यस्येतिकिम् वासिष्ठीयति वात्सपत्येऽत्य
ण् आपत्यस्येतिकिम् अक्षीयति आमाायते अस्वरपूर्वस्येतिकि
म् आग्नेयीयति आग्नेयी स्यआदेरेयण् अतोयेकादितिईप्रत्ययः
यिन्नायीषितिकिं गार्ग्यकाम्यति **नलोपश्च** लिङ्गस्यान्तकान्
रस्तस्यलोपोभवति यिन्नाय्योःपरयोः राजीयति राजायते विद्व
स्यति विद्वस्यते राजानमिच्छत्यात्मनः राजाइवाचरति विद्वां
समिच्छत्यात्मनः विद्वानिवाचरति विद्वांसमिच्छत्यात्मनः वि
द्वानिवाचरति यिन् आयिःराजन् घाद्धात्प्रकृतिकार्यमन्तर
ङ्गमित्यादौनलोपेकृतेव्यञ्जनाख्याभावादायेरादिलोपोभव
ति अन्यत्रादिलोपः **व्यञ्जनाद्दिस्योः** व्यञ्जनात्परयोर्दि
स्योर्लोपोभवति अवेत् अद्वेट् अलेट् अधोक् विदज्ञाने द्वि
ष अप्रीतौ उद्दअपूरणे लिहआस्वादने ह्यस्तनीदि सि अ
त्वि अदादेर्लुक् उपधायुणः अनेनदिस्योः लोपः हवाढ्ढ
न्तेतिघस्यढस्यटः पदान्तेधटांप्रथमः इद्देवादेर्वः लोपेच
दिस्योरितिदस्यथः व्यञ्जनादितिकिम् अपचत् अपचःदिस्यो
रितिकिंवेत्ति **यस्यानन्यधातोः** व्यञ्जनात्परस्ययकारस्य
लोपोभवति अनाति अविकरणादन्यस्मिन्प्रत्ययेपरे अधा
तोः यातसंबन्धिनोयकारस्यलोपेनभवतीत्यर्थः पापचिता
पापचिष्यते बेभिदिता बेभिदिष्यते अत्यर्थंपक्ता पक्ष्यते भे
त्ता भेत्स्यति धातोरेकस्वरादितियङ्गाङ्गः द्वित्वं दीर्घोनाम्यन
न्तस्येतिदीर्घः गुणश्चेकीयितेइतिगुणः पापच्य बेभिद्य इति
स्थलता भविष्यन्तीश्वोइ्अस्यचलोपः अननीतिकिंलावंलके
लट्यते अननीतिकिं पापच्यते अधातोरितिकिं मव्यिता म

ऽबन्धने व्यञ्जनादितिकिं लोलूयिता अस्यचलोपः अ
धातोरितिनिवृत्तम् अकारस्यलोपोभवति अनिपरे पापचि
ता चिकीर्षिता अत्यर्थंपक्तापापचाङ्ः कर्तुमेषिता सन् स्वराना
नांसनीतिदीर्घः ऋदन्तस्येर् नामिनोर्वोरितिदीर्घः द्वित्वं इट्य
नेनाकारलोपः चेक्रीयिता यस्यानन्त्यधातोरितियलोपः कथय
ति स्फुटयति कथवाक्यप्रबन्धे स्फुटईप्सायाम् चुरादेश्चेतिइन् अ
नेनालोपः (कथयति स्फुटयति कथवाक्यप्रबन्धे स्फुटईप्साया
म् चुरादेश्चेतिइन् अनेनालोपः) सिचोधकारे धकारादौ
प्रत्ययेपरे सिचोलोपोभवति अलविढ्वम् अपविढ्वम् लूञ्छे
दने पञ् पवने अद्यतनी ध्वम् सिच् इट् अनेनसिचोलोपः सिचइति
किम् चकाद्धिचकास्तदीप्तौ पञ्चमीहि हधुड्भ्यो हेर्धिः धुटांतृ
तीयश्चतुर्थेइतिस्यानसावर्ण्यात्तस्यतृतीयोदः धकारेइति।
किम् अलाविषाताम् धुटश्चधुटि धुटःपरस्यसिचोलोपोभ
वति धुटिपरे अभिन्न अभिन्याः अबुद्ध अबुद्धाः भिदिर् विदा
रणे बुध अवगमने अद्यतनी तथास् सिच् अनेनसिचोलो
पः अघोषेष्वशिटांप्रथमइतिदस्यतः बुधेः वाढघभेभ्यस्तथो
र्धोधइतितथोर्धः धुटांतृतीयश्चतुर्थेइतिधस्यदः धुटीतिकिम्
अभित्सताम् अभुत्साताम् सिच् ह्रस्वाच्चानिटः ह्रस्वान्त
स्य अनिटः सिचोलोपोभवति धुटिपरे अकृत अकृथाः अ
द्यतथास् अनेनसिचोलोपः ऋदन्तानांचेतिगुणाभावः ऋ
तोऽकृन्नइतिरइभावः ह्रस्वादितिकिम् अचेष्ट चिञ्प्रकृती
कार्यमन्तरङ्गमिति आदौगुणेकृते ह्रस्वाभावात्सिचोलोपोना
स्ति अनिटइतिकिम् अवारिषाताम् हृञ्वरणे अद्यताम् सि

ञ् इट् सिचिपरस्मैइतिवृद्धिः **इटईटि** इटःपरस्यासिचः ईटि
परेलोपोभवति अलावीत् अपावीत् अकोषीत् दि सिच् इ
ट् ईट् लूञ्पूञोर्वृद्धिःकुषेः उपधायागुणः इटइतिकिम् अका
र्षीत् ईटीतिकिम् अलाविषम् **स्कोःसंयोगाद्योरन्तेच**
का.४ संयोगस्यादिभूतयोःसकारककारयोर्लोपोभवति धुटिपरे अन्तेप
देच धुटिलावत् आलिषाते आचिषाते दुलभष्ट्राधौ रभ
राभस्ये आलब्धुमिच्छति आरब्धुस्यन् द्वित्वं सनिमीमादेति
धात्वकारस्य इस् अभ्यासलोपश्चअनेनसलोपः अघोषेष्व
शिटांप्रथमइतिभस्यपः कस्ययथाधुटि आरब्धुचत्वारि अक्षा
यंवाचि आश्चूर्वःते आचिलक्षु अनेनकलोपः तवर्गस्य
षटवर्गाट्टवर्गइतितस्यटः अन्ते स्कोर्यथा अवावक्ष अ
वरइ असवर्णमवस्कन् वस्कगतौ रक्षपालने कुटिलमव
स्कत् असवर्णमरक्षत् यस्याह्ः तस्यवाचेक्रीथितस्य रक्ष
द्वित्वं दीर्घोनाचामान्तस्येतिदीर्घःअव्यनाहस्येतितिलोपःअलेपहे
लोपःपदान्तेधुटांप्रथमइतिषस्यटः धुटीतिकिम् वस्कने
रक्षति **चवर्गस्यकिरसवर्णे** चवर्गस्यकत्वंभवति
धुटिअन्तेच इकारउकारश्वार्थः पक्ता पक्ष्यति योक्तायो
क्ष्यति पचू युज्ञ ताक्ष्यति उपधायागुणः अनेनकत्वम् अ
न्तेयथा अपाक् अयोयोक् असवर्णमपचत् असृनक
यस्याह्ःतस्यवाचेक्रियतस्येतिलक् द्विर्वचनादिपूर्ववत्
अनेनकः धुटीतिकिम् वक्षिशुनक्ति अन्विलक्ष स्वराद्
यादेः परोनश्चाह्ः असवर्णेइतिकिं इच्छति उच्छति इ
षुइच्छायाम् उञ्छहानौ गामिषु प्रमाद्धः **होढः**

दकारस्य ढत्वं भवति धुटि परे पदान्ते च लेक्ष्यति अलेक्ष्यत् लि
ह्यास्वादने स्यति स्यत् अनेन हस्य ढः षढोः कः से इति ढस्य कः
षत्वं उपधायाः गुणः सोढा वोढा षढमर्षणे वहप्रापणे अल
लीढा अनेन हस्य ढः झषन्तथभेति तस्य धः तवर्गस्य टवर्गा
देशः इति धस्य ढः ढे ढलोपो दीर्घश्चोपधायाः सहिवहोरो
दवर्णस्येति ओत्वम् अलेट् लिह आस्वादने क्विप् उपधागुणा
दिलोपे अनेन हस्य ढः पदान्ते धुटां प्रथमः ढस्य टः धुटीति
किम् लिह्यते यङ् दादेर्घः दकारादेर्धातोर्हस्य घत्वं भवति
धुटि पदान्ते च कर्त्वं प्राप्नोति देग्धा दोग्धा उहप्रपूरणे स्नल
ता उपधागुणः अनेन हस्य घः झषन्तथभेति तस्य धः धुटां
तृतीयश्चतुर्थे इति घस्य गः अधोक्ष्यत् क्रियातिपत्तिः स्यत् अधा
क्षादिः अनेन हस्य घः तृतीयादेर्घढधभान्तेति दस्य धः अधो
क्षाधीढामिति घस्य कः षत्वं धुटीति किम् दुह्यते नयति
नहेर्धः णहबन्धने इत्यस्य धत्वं भवति धुटि परे अन्ते च नद्धा
नत्स्यति णोनः नास्यति अनेन हस्य धः झषन्तभेभ्यः इति तस्य
धः धुटां तृतीयचतुर्थे इति धस्य दः अधोक्षाधीढां प्रथम इ
ति सकारे तः अन्ते अनानत् अन्वर्थमनह्यत् यथाऽऽहः लुङादि
षु अभ्यासस्य दीर्घादि दि सद्धात्वादि दिलोपः अनेन हस्य धः
पदान्ते धुटां प्रथमो धस्य तः धुटीति किं नह्यति दिवादेर्य
न भ्रज्जादीनां षः भ्रज्जादीनां धातूनां सकारस्य षत्वं भव
ति धुटि अन्ते च भ्रस्जपाके सृजविसर्गे मृजूष् शुद्धौ राजृदीप्तौ
[illegible] भ्राजामत्यादिकानां धातूनां राजदीप्तौ भ्राजदीप्तौ [illegible]
भ्रज्जादयः भ्रष्टा भ्रष्टुं भ्रष्टः अत एव निर्देशात् [illegible]

नाभवति स्कोः संयोगाद्योरन्ते चेति सलोपः अनेन जस्य षः तव
र्गस्य षटवर्गाद्दवर्ग इति तस्य टः स्रष्टा स्रक्ष्यति सृजिदृशोरा
गमोऽकार इति जस्य षः मार्ष्टा मार्क्ष्यति उपधायाश्चोक्तते मर्जो
मार्ष्टिः भ्रज्जनम् भर्जनम् भ्रज्जकः भर्जकः अत्र भृज्जादेशा
विकल्पः स्वरेतन षत्वम् अन्येयथा अवरीभट् असरीसट्
अमामाट् अयायट् अरावाट् अबाभ्राट् अत्यर्थे अभृज्जात् अ
स्रजत् अमृजत् अयजत् अराजत् अभ्रजत् इति वाक्ये लङ्
ने धातोरेकस्वरेति यङाङ् वा चेक्रीयितस्येति लुक् भृजेः ग्र
दिज्यावधीति संप्र द्वित्वं अभ्यासकार्यम् ऋमतोरी स्यसतीदि
श्चिलक् दिलोपः स्कोः संयोगाद्योरिति सलोपः पक्षे भृजा
देशः उपधायास्तः राजिभ्राज्योरभ्यासस्याङ्गस्वेङ्गते दीर्घोऽला
गमान्तस्येति दीर्घः अनेन जकारस्य षः तस्य पदान्ते षटोश्च
ष्टुम इति स्थानसावर्ण्यात् प्रथमः टः सृजेः मर्जो मार्जिः
षत्वं प्राग्वत् झलीति किम् भृज्यते झलां स्तीय इति स्था
न सावर्ण्यात् स्तीयो दः तवर्गस्य टेति जः **छशोश्च**
छकार शकारयोः षत्वं भवति झलि पदान्ते च प्रष्टा प्रक्ष्य
ति वेष्टा वेक्ष्यति प्रच्छ ज्ञीप्सायाम् विश प्रवेशने नाम्याति
द्रष्टा द्रक्ष्यति अनेन छशोः षः प्रच्छेः निमित्ताभावे नैमित्ति
कस्याप्यभाव इति छनिवृत्तौ च निवृत्तिः दृशेः सृजिदृशोरा
गमोऽकारः अनेन शस्य षः अन्ते अपरीपट् अदरीदृट् अ
त्यर्थे अपप्रच्छत् अपपपत् धातोरेकस्वरेति यङाङ् तस्य
लुक् प्रच्छेः ग्रहिज्यावयीति संप्र द्वित्वं [illegible] मतोरीकारा
दि अभिलक् दशेः अकारागमः दिलोपः [illegible]

पदान्तेभ्रुवोरिमितिषत्वः उपधागुणः पचते अनुदात्तस्य च
र्दुपधस्यान्यतरस्यामित्यकारागमः धुटीतिकिम् दृप्यते
इष्यते यण्संज्ञा **भाषितपुंस्कंपुंवदाद्यौ** भाषित
पुंस्कं यदविशेषवृत्तं स्त्रीलिङ्गं तदाद्यप्रत्यये परे पुंवद्भवति
पुंसि यद्रूपं तदाप्नोतीत्यर्थः ब्राह्मणीवाचरति ब्राह्मणा
यते पत्नी पत्नायते श्येनी श्येतायते हरिणी हरिताय
ते पत्नश्येत हरितादीनां तपोयान्नो नकारश्चेति स्त्रिया
मी प्रत्ययः नकारस्य नत्वं च कर्त्रादिः अनेन पुंवद्भाव
ईत्वे नत्वमिति द्वयमपि निवर्तते ब्राह्मणादयश्चैव हारिता
भवन्तीत्यर्थः **आतामाथामादेरिः** आत् अका
रात्परयोः आतां आथां इत्येतयोः आदेः इत्वं भवति पचेताम्
पचेथाम् पञ्चमी आताम् आथाम् अन्वि अनेनाकारस्येत्व
म् **आतेआथेइति च** आते आथे इत्येतयोः आदेः
इत्वं भवति पचेते पचेथे वर्त आते आथे अन्वि अनेन आ
कारस्येत्वम् **यासाह्रस्वश्च सप्तम्याः** अकारात्परस्य
सप्तम्याः संबन्धिनो यासाह्रस्व इत्वं भवति पचेत् पचेताम्
पचेः पचेतम् पचेत पचेव पचेम यात् याताम् याम्
यातम् यात याव याम अन्वि अनेन यासाह्रस्व इत्वम्
कर्तरि स्यात् सन् आशीर्यात् अस्य च लोपः **यम्उसौ**
**रियमियुसौ** अकारात्परयोः याम् उस् इत्येतयोः
यथासंख्यम् इयम् इयुस् इत्येतावादेशौ भवतः पचे
यम् पचेयुः याम् उस् अन्वि आदितिकिम् ऋयाताम्
ऋयुः ततादेशः करोतेरिति गुणः अस्याकारः सप्तम्यां

चेत्ककारलोपः **शमादीनांदीर्घोयति** शमुउप
शमे तमुकाङ्क्षायाम् दमुउपशमे श्रमुतपसिखेदेच क्ल
मुग्लानौ भ्रमुअनवस्थाने क्षमूषसहने मदीहर्षे एतेशमा
दयः एषांह्रस्वस्यदीर्घोभवति शाम्यति ताम्यति दाम्यति
श्राम्यति क्लाम्यति भ्राम्यति क्षाम्यति माद्यति दिवादेर्यनुय
नीतिकिम् शमिता **ष्ठिवुक्लम्वाचमामति** ष्ठिवु
निरसने क्लमुग्लानौ चमुअदने आङ्पूर्वः एषामतिपरेह्र
स्वस्यदीर्घोभवति ष्ठीवति क्लामति आचामति॥ **क्रमःपर
स्मै॥** क्रमुपदविक्षेपे इत्यस्य अतिपरेदीर्घोभवति क्रामति
परस्मैइतिकिम् क्रमते **गमिषुयमांछः** गम्लृग
तौ इषुइच्छायाम् यमुउपरमे एषामन्त्यस्यछत्वंभवति
अतिपरेगच्छति इच्छति यच्छति तस्यद्विर्भावः अचोषेषु
यमइतिह्रस्वः **पः पिवः** पापानेइत्यस्य अतिपरे
पिव् आदेशोभवति लोपःपिवतेरीच्चाभ्यासस्येतिनत्वापका
क्षणाभावः पिवति॥ **घ्रोजिघ्रः**॥ घ्राणन्धोपादानेइत्यस्यअतिप
रेजिघ्र् आदेशोभवति जिघ्रति **ध्मोधमः** ध्माशब्दा
ग्निसंयोगयोरित्यस्यधम् आदेशोभवति अतिपरे धमति
**स्थस्तिष्ठः** ष्ठागतिनिवृत्तावित्यस्य अतिपरे तिष्ठ् आ
देशोभवति तिष्ठति **म्नोमनः** म्नाअभ्यासे इत्यस्य अ
तिपरे मन् आदेशोभवति मनति **दाणोयच्छः**
दाण् दाने इत्यस्यातिपरेयच्छ् आदेशोभवति यच्छति
**दृशोःपश्यः** दृशिर्प्रेक्षणे इत्यस्यातिपरेपश्य् आ
देशोभवति पश्यति **ऋतेर्ऋच्छः** ऋगतिप्रापण

योऽनित्यस्यानि परे ऋच्छ आदेशो भवति ऋच्छति
**सर्तेर्धावः** सृ गतावित्यस्य धाव आदेशो भवति धाव
ति **शदेः शीयः** शद्लृ शातने इत्यस्यानि परे शीय
आदेशो भवति शीयते **सदेः सीदः** षद्लृ विशरणे
इत्यस्यानि परे सीद आदेशो भवति सीदति **ज्ञाजने**
**विकरणे** जनी प्रादुर्भावे इत्यस्य विकरणे परे जा आदे
शो भवति जायते **ज्ञश्च** ज्ञा अवबोधने इत्यस्य जा
आदेशो भवति विकरणे परे जानाति **प्वादीनां ह्रस्वः**
पूञ् पवने लूञ् छेदने स्तॄञ् आच्छादने कॄञ् हिंसायाम् वृ
ञ् कम्पने शॄ हिंसायाम् पॄ पालनपूरणयोः स्तृ हिंसाया
म् वॄ वरणे भॄ भर्जने दॄ विदारणे जॄ वयोहानौ नॄ नये
ऋ गतौ गॄ शब्दार्थः उदात्ताः व्री वरणे री गतिरेषणयोः ली
श्लेषणे ब्ली गतौ वृत् एते प्वादयः एषां विकरणे ह्रस्वो भ
वति पुनाति लुनाति स्तृणाति कृणाति धुनाति शृणा
ति पृणाति स्तृणाति वृणाति भृणाति दृणाति जृणाति
नृणाति ऋणाति गृणाति व्रिणाति रिणाति लिनाति
ब्लिनाति विकरण इति किम् पूयते लूयते **उकार**
**स्य वृद्धिर्व्यञ्जनादौ गुणिनि सार्वधातुके**
उकारस्य वृद्धिर्भवति गुणिनि सगुणे व्यञ्जनादौ सार्वधा
तुके परे स्तौति यौति रौति ष्टुञ् स्तुतौ यु मिश्रणे रु
शब्दे तिप् त्यस्तीदि अवि लक अनेन उकारस्य वृद्धिः
व्यञ्जनादाविति किम् स्तवानि अस्तवम् पञ्चमी आलि
ह्यस्तनी अम् गुणः गुणिनीति किम् स्तुतः स्तुते मानात्

सार्वधातुकेइतिकिम् स्तोता श्वस्तनीत्यगुणः ऊर्णोतेर्वा
ऊर्णुञ् छादने इत्यस्य वृद्धिर्वा भवति व्यञ्जनादौ गुणिनि सा
र्वधातुकेपरे प्रोर्णौति प्रोर्णोति ति अविकल्पक्व व्यञ्जनादा
वितिकिम् प्रोर्णुवन्ति गुणिनीतिकिम् प्रोर्णुतः तु
**रोत्यस्तस्याच** ऊर्णोतेर्हसमात्रादौपित्यगुणोभवति
प्रौर्णोत् प्रौर्णोः ह्यस्तनी दि सि स्यवादीनां वृद्धिरादेः अवि
कल्पः अनेनान्यस्यगुणः **तृहेरिड्विकरणात्**
तृहि हिंसायामित्यस्य विकरणात्परइडागमो भवति
व्यञ्जनादौगुणिनिसार्वधातुकेपरे तृणेढि तृणेक्षि तृ
णेह्मि तृणेढु अतृणेट् ति सि मि त ह्यस्तनीदि स्वराद्
यादेरितिनवाट् अनिदनुबन्धेतिलोपकात् हननकार
स्य नशात्वाद्विकरणादितिलोपः अनेनपाठाघन्तर्गत् अ
वर्णेइवर्णेए ढो ढः झषथभेभ्य इतिनस्यधः तवर्गःष्टे
तिधस्यढः ढेढलोपः अव्यञ्जनादाविति किम् तृणहानि प
ञ्चमी आनि गुणिनीतिकिम् तृण्ढः तृण्हन्ति ढत्व
ढत्वढलोपाः प्राग्वत् **ब्रुवईड्वचनादिः** ब्रूञ् व्य
क्तायांवाचि इत्यस्मात्परस्यव्यञ्जनादेर्गुणिनः सार्वधातु
कस्यवचनंतस्यादिः ईडागमोभवति ब्रवीति ब्रवीतु अ
ब्रवीत् ति त ह्यस्तनीदि अविकल्प अनेनईट् गुणः उव्
व् अव्यञ्जनादाविति किम् ब्रुवन्ति गुणिनीतिकिम् ब्रूतः
सार्वधातुकेइतिकिम् वक्ता
श्वस्तनीता ब्रूवोवचिः **अस्तेर्दिस्योः** अस ब्रू इत्य
स्मात्परयोःदिस्योः ईडागमोभवति आसीत् आसीः ह्यस

दिसि अन्वि लङ् अलेविसाकारः **सिचः** सिचः परयोर्दि
स्योः इडागमो भवति अकार्षीत् अकार्षीः अलावीत् अलावीः
सिचि वृद्धिरस्मा इति वृद्धिः कृञः कृतो इकृञ इतीड्भावः लूञः इ
ट् इट ईटि इति सिज्लोपः **रुदादिभ्यश्च** रुदिर् अश्रुविमो
चने ञिष्वप् शयने अन प्राणने श्वस प्राणने जक्ष भक्षहसनयोः इति
पञ्च रुदादयः एभ्यः परयोर्दिस्योरीडागमो भवति अरोदी
त् अरोदीः अस्वपीत् अस्वपीः प्राणीत् प्राणीः अनितेरिति
नत्वाद् अन्तरात् भिन्नपदेऽपि नस्य णत्वम् अश्वसीत् अश्वसीः अ
जक्षीत् अजक्षीः ह्यस्तनी दिसि अन्वि लङ् अनेन ईड् **अ
दोऽट्** अद भक्षणे इत्यस्मात् परयोर्दिस्योः अट् आगमो भव
ति आदत् आदः अन्वि लङ् अयमस्याकारः अनेनाडागमः
टकार आद्यन्तौ टकितावित्यर्थः **सस्य से सार्वधातुके
तः** सकारस्य तत्वं भवति सकारादावसार्वधातुके परे
वत्स्यति जिघत्सति वस निवासे अदे घस्लृ अत्तुमिच्छति
सन् द्वित्वं अभ्यासकार्यम् सनन्तात् ति अन्वि असत्यवता
लोपः सस्येति किम् वक्ष्यति वच् असार्वधातुक इति किम्
आस्ते आस उपवेशने वर्त आत्मनेपदे से अन्वि लङ् आस्ता

**अणि वचेरोदुपधायाः**

वच परिभाषणे इत्यस्य ह्यस्तादेशस्य वा वचेः अ
णि परे उपधाया ओत्वं भवति अवोचत् अद्यतना
दि अस् अवचीत्यत्र अनेनास्योत्वम्

**अस्यतेस्थोऽन्तः** अस क्षेपणे इत्यस्य
अणि परे थकारागमो भवति ॥ आ

स्यत् आस्यताम् आस्थन् अवर्त्तस्याकारः **अयतेरः** अयते
रन्त्यस्य अतिपरे अकारादेशो भवति अयत् उङोस्थि अयतीति
अझात्वादिः अनपवनिदैर्घ्यात् अनेनाकारादेशः **पतेः
पाविः** पल्लगमादित्यस्य अतिपरे पादितादेशो भवति
इकार उच्चारणार्थः अपप्तत् अपप्तिष्ट अपप्तिषुः
**कृपो लः** कृपस्यामर्थे रन्त्यस्य रेफस्य लकारादेशो भ
वति कल्पा कल्पयति तास्यति गतः अनेन यपलः **उपस
र्गस्यायतौ** उपसर्गस्य रेफस्य आयतौ अयगमादित्य
स्मिन्परे लत्वं भवति पलायते पलायते पल्ययते पल्ययनम्
अयतौ पराम परिपूर्वो ते इति प्रत्युक्तिसुद् प्रत्ययमित्यनादेशः
अयतावितिकिम् परायते प्रतीयते वर्ता ए इति अनन्ययेन
रयोरित्यनेन णत्वम् परस्य पकारस्य च लोपः **गिरते श्चक्री
यिते** गृणातिगिरतोरन्त्यस्य रेफस्य चेक्रीयिते परे लत्वं
भवति निजेगिल्यते गर्हितं निगिलति सुपसदचरजप
जभदहदशगृभ्यो भावगर्हायामिति यङ्गः कदतस्ये
र चेक्रीयितेइतिकिम् गीर्यते वायौ **वा स्वरे** गिरतेः रे
फस्य स्वरे परे लत्वं वा भवति गिरति गिलति निगरणम्
निगलनम् गुरु गणः स्वरे इति किम् गीर्णः निर्गुतिकः
अदन्तस्यन् नामिनोर्वोरितिदीर्घः गाम्यामानइतिनः
**तृतीयादेर्घढधभान्तस्य धातोरादिचतुर्थ
त्वं स्ध्वोः** तृतीयादेर्धातोः घढधभान्तस्य आदेः चतुर्थ
र्थो भवति तृतीयस्य चतुर्थो भवतीत्यर्थः सका
रे ध्वशब्दे परे अधोक्ष्यत अधोक्ष्यत अभोत्स्यत इत्यादि

ति गुहूसंवरणे बुधअवगमने क्रियातिपत्तिःस्यात् अघो
क्षि: इहेढोदेशेइतिहस्यढः गुहेः होढः ढस्य षढोःकः
से घस्य एकाचोबशोभष्झषन्तस्येतिकः षस्यतः अनेनादिचतुर्थ
त्वम् बुधे अबुधम् इह वर्त्तते पञ्चमम् अस्ति लुङ्
दादेर्धः षढोस्तृतीयइतिवसगः अधुगयम् अधूक्षम्
अघतनीयम् सस्मानिटइतिसगा तस्यलस्वाङ्गदिद
लि क्रूरदामात्मनेपदेदन्त्येइतिलुक् गुहेः दादेर्धः षढो
स्तृतीयइतिचसगः गुहेः होढः तवर्गःषढोनिधस्यढः ढे
ढलोपोदीर्घश्चाणयाः अधूढम् बुधु अवगमने सिचि न
स्यासिचौयोकारेइतिलोपः अन्यत्सागवत् धिप्सति दम्भु द
म्भे इच्छिवासिच्छतिसन् द्विर्वचनेऽचीति अकारस्येत्
त्वम् अभ्यासलोपश्च अनेनादिचतुर्थत्वं लतोयांवेरि
तिकिम् जोक्ष्यति कृपकोपे स्यति एकाचोबशोभष्झषन्तस्येति
सस्यतः उपधात्रामः बहूपभान्तस्याकिम् वाचयति स्यो
तितिकिम् दोग्धा इह धलोपेना दादेर्धः बहूपभस्यइ
तिसस्यधः उपधात्रामः आगमात् वसगः लोपेचादि
त्योः बहूपभान्तस्यलतीयादेर्यालोः पुरयोः दि
त्योः लोपेकृते आदिचतुर्थत्वंभवति अघोक्ष अघोक्ष
इ गुहसंवरणे गुहूसंवरणे गुहेः स्यसनी द्वि सि
अविलुङ् यजनादिसंज्ञाविनिर्दिष्टाः दादेर्धः न
स्यघढाजोधत्वावयमः आदिचतुर्थत्वम् उपधात्र
मः अज्ञानादिः गुहेः अयम् मम् वम् यशाहः गा
हकीघितसंतितस्यलुक् द्विर्वं अभ्यासलोपेन न

कीर्तिपरस्मैपदानीति ह्यस्तनीादि अन्ति अक आवहि
लोपः अनेनादिचतुर्थत्वम् उपधायाः ताः तस्यमादेरु
पधायाः इतिऋकारः होढः पदान्तेधुडंप्रथमः स्तती
यादेरितिकिम् अलेढ् लिहआस्वादने ह्यस्तनीादि अन्ति
स्वक दिलोपः होढः प्रथमः उपधायाः स्थफपभान्त
स्येतिकिम् अद्वेट् द्विषअप्रीतौ ह्यस्तनीादि अन्तिसक आ
वहिलोपः द्वेट् षढोःकःसि षस्यठः वाविरामेइतिठः

**तथोर्धश्चदधातेः** डुधाञ् दानधारणयोरित्यस्या
दिचतुर्थत्वंभवति स्थोःपरयोः तकारथकारयोश्च प
रे धद्धे धत्तः धत्थः धत्ते से ध्वे तस् थस् अन्ति तदे
मादेरितिलुक् ददाम्नादीनांद्वित्वं ह्रस्वः अभ्यस्ताना
माकारस्यास्यलोपः प्रथमतृतीयोप्राग्वत् अनेनादि
चतुर्थत्वम् **इतितृतीयात्मनेपदप्रकरणम्**

**अथचतुष्पादःषष्ठः ९ ओं इडागमोसार्वधातु
कस्यादिव्यञ्जनादेरयकारादेः** धातोःपरस्य
व्यञ्जनादेरसार्वधातुकस्यादिः इडागमोभवति अय
कारादेः यकारादिअसार्वधातुकंवर्जयित्वा भविता
भवितुम् भवितव्यम् वेदिता वेदितुम् वेदितव्यम् अ
सार्वधातुकस्येतिकिम् आस्ते वस्ते व्यञ्जनादेरितिकि
म् बभूव अयकारादेरितिकिम् भूयते भूयात्

**स्तुक्रमिभ्यांचपरस्मै** स्तुञ् स्तवने क्रमुपदवि
क्षेपे आभ्यांपरस्मैपदविषये आभ्यांपरस्मैपदनिमि
त्ताभ्यांपरस्य असार्वधातुकस्यव्यञ्जनादेः आदिरिडा

गमो भवति प्रस्नविता प्रस्नविष्यति क्रमिता क्रमिष्यति
**सार्वधातुके च रुदादेः** रुदादयः पंचधातवः ते
भ्यः परस्मिन्सार्वधातुके व्यञ्जनादौ यकारादौ आदिति
इडागमो भवति यकाराद्सार्वधातुके च रोदिति स्वपि
ति प्राणिति श्वसिति जक्षिति **ईशास्से** सार्वधातुके
इत्येव ईशापेक्षयं अस्मात्परस्मिन्सकारादौ सार्वधातुके
इडागमो भवति ईशिषे ईशिष्व वर्णास पक्वास्स सेइति
किम् ईष्टे अपि लङ् ऐष्टाख्यातिरप्यसः तवर्गस्यष्टे
तिनस्यटः **ईडजनोर्ध्वे च** ईडजनी जनजनने अन
योः ध्वशब्दे यथाप्राप्तं सकारादौ सार्वधातुके च परे इडा
गमो भवति ईडिध्वे ईडिध्वम् अपि लङ् अनेनइट् स्व
स्नयोः स्वरादीनां वृद्धिरादेः ऐडिध्व ऐडिध्वं जनिध्वे छान्द
सत्वादात्मनेपदम् द्विर्वचनोपधालोपाभावश्च जनिज्ञ
निध्वे व्यतिजज्ञिध्वम् व्यतिजज्ञिध्वे व्यतिजज्ञिध्व जनजन
ने कर्मव्यतिहारे आत्मनेपदम् विज्ञातिपूर्वौ अपि जवे
त्यादेशेति लङ् द्विर्वे अनेनइट् गमहनेत्युपधालोपः
तवर्गस्य टेतिन स्यजः **सेगमःपरस्मै** गच्छगता
वित्यस्मात्परस्मैपदविषये सकारादौ प्रत्यये परे इट्भव
ति जिगमिषति अगमिष्यत् गन्तुमिच्छति सन् इट्
द्विर्वचनादिविति किम् संजिगंसते संगंस्यते सङ्गन्त
मिच्छति समोगम्यृच्छ्रीत्यात्मनेपदम् **हनृदन्तात्**
**स्ये** हनहिंसागत्योरित्यस्मात् ऋकारान्ताच्च धातोः
स्यशब्दे परे इट् भवति हनिष्यति हनिष्यते करिष्यते क

रिष्यते इत्यदन्तादितिकिम् ग्लाति **अञ्जेः सिचि**
अन्त्याञ्जिरक्षाकानानिति इत्यस्याङ्गालो सिचिपरे इट्
भवति ऊदित्वात् विकल्पः प्राप्तः आञ्जीत् आञ्जिष्टा
म् आञ्जिषुः अयतीदि ताम् अन् सिच् विशतये सिचइती
ट् इट्ईटीतिसिच्लोपः अनडस् अवर्णस्याकारः वर्णो
वर्णेन इति नस्याः **स्तुसुधूञ्भ्यः परस्मै** ष्टुञ्
स्तौ षुञ् अभिषवेषु प्रसवैश्वर्ययोरितिवा धूञ् कम्प
नेएभ्यः सिचिपरस्मैपदेपरे इट्भवति अस्तावीत् अ
सावीत् अधावीत् अधा दि सिच् इट् ईट् इटईटी
सिच्लोपः सिचिपरस्मै इति वृद्धिः परस्मा इति किम् अ
स्तोष्ट असोष्ट अधोष्ट अधविष्ट अधा त सिच् धूञः प
क्षे इट् प्राप्तः **यमिरमिनमातां सक्च**
**स्य** यम उप रमु क्रीडायाम् णम प्रह्वत्वे आकारान्तानां
चधात्वन्तानां सिचि परस्मैपदे परे इट् भवति तस्मात्पूर्वः
सकारागमश्च अयंसीत् अयंसिष्टाम् अयंसिषुः अरं
सीत् अरंसिष्टाम् अरंसिषुः अनंसीत् अनंसिष्टाम् अ
नंसिषुः अयासीत् अयासिष्टाम् अयासिषुः याधातो
अयादि ताम् अन् सिच् इट् सकारागमश्च ईट् सिज्लो
पः नस्य मनोरनुस्वारः **स्मिपूङ्रञ्ज्वशूकगृहृदृ
धृप्रच्छां सनि** स्मिङ् ईषद्धसने पूङ् पवने ऋउर
सिञ्चाप्रापणयोः ऋ सवरणादितिवा सकृत्यतिः अञ्जू
व्यक्ते कृविक्षेपे गृनिगरणे गृधाद्वेइतिवा दृङ्. आद
रे धृङ्. अवस्थाने प्रच्छज्ञीप्सायाम् एषां सनि परे इट्

भवति क्रिडुः इवर्णादश्विश्रिडीशीङ्भ्यश्चेति निषेधः प्राप्तः
शिशिक्षिषते पिपविषते अशिशिषति अजिजिषति अ
शिशीषति चिकरिषति जिगरिषति दिदरिषते दिधरि
षते पिपृच्छिषति विस्मयितुमिच्छति पठितम् स्वर्तम्
आंजितम् अशितम् करितम् गरितम् दरितम् धरितम्
पृच्छिषति सीमिस्मन् यदि स्वपिश्रयोः समीतिप्रत्ययः संस
अनेनइट् स्वरादीनां द्वितीयस्यैकस्वरस्य रि मि षि इ
तिद्वित्वं पुनः अभ्यासस्य उवर्णस्य जान्तस्थोरिति इत्वम्

**इटोदीर्घोग्रहेरपरोक्षायाम्** ग्रहउपादाने य
स्मात्परस्य इटोदीर्घोभवति अपरोक्षायांपरोक्षायां
यइट् तस्यनभवतीत्यर्थः ग्रहीता ग्रहीतुम् ग्रहीत
व्यम् गाहम् गाहः इट् अनेनइटोदीर्घः अपरोक्षायामि
तिकिम् जगृहिथ जगृहिव जगृहिम परोक्षायाम्
म इट् वमयोरप्यद्विर्येतिनिषेध **अनिडेकस्वराद्धा**
**तः** आकारान्तात् एकस्वराद्धातोः परस्यप्रत्ययस्य
अनिड्भवति इडनभवतीत्यर्थः याता यास्यति एकस्व
राविति किम् दरिद्रिता दरिद्रिष्यति दरिद्रातेरसार्व
धातुके इत्यालोपः **इवर्णादश्विश्रिडीशीङः**
इवर्णादेकस्वरात् धातोः परस्यासार्वधातुकस्य इडनभ
वति क्रेष्यति द्वयोः श्रिञ् सेवायाम् डीङ् विहाय
सायासो शीङ् स्वप्ने एतान्वर्जयित्वा चेता नेता एकस्वरा
दितिकिम् दीधिता दीधीवेव्योरिवर्णयकारयोरिति इ
कारलोपः श्वयिता श्विश्रिहिंसार्थः आश्विश्रिडीशीङ् इ

तिकिम् क्षयिता श्रयिता डयिता शायिता ग्रसाः
**उतोऽवृक्षवृत्स्नुवृत्सावः** उकारान्तात् एकस्वराद्धा
तोः परस्य असार्वधातुकस्य इट् न भवति युभि युञ् क
शाहे ण्डस्तवे ड्डु शाहे स्नु क्षु प्रस्रवणे णु तेजने एता
न्वर्जयित्वा स्नोता एकस्वरादितिकिम् प्रोर्णविता अवृ
क्षवृत्स्नुवृत्सावइतिकिम् यविता रविता नविता स्नवि
ता क्षविता क्ष्णाविता **ऋतोऽवृवृञः** ऋवर्णा
न्ताद्धातोः एकस्वरात्परस्य असार्वधातुकस्य इट् न भव
ति वृङ् संभक्तौ वृञ् वरणे एतौवर्जयित्वा कर्ता हर्ता स्व
र्तिता ग्रसाः एकस्वरादितिकिम् जागरिता अवृवृ
ञइतिकिम् वरिष्यते वरीष्यते वरिष्यति वरीष्यति
इडन्तवृवृञोऽतङ्हादिष्वोदीर्घो विभाषयाइति वा इटो
दीर्घः **शाकेः कात्** शकविभाषितो मर्षणे शक्ल
शक्लावितिवा अस्मात्परस्यासार्वधातुकस्य इट् न भव
ति कादितिककारान्तानां मध्यात् शाकेरेवमर्थः पं
चात् छात् जात् दात् इत्यादिष्वसेयम् शक्ता
**पचिवचिसिचिरिचिविचिमुचेश्चात्** डुपचं
ष्पाके वच भाषणे षिञ् बन्धने षिचिर् क्षरणे रिचिर्
विरेचने विचिर् पृथग्भावे मुच्लृ मोचने एभ्यः परस्या
सार्वधातुकस्य इट् न भवति पक्ता वक्ता सेक्ता रेक्ता वे
क्ता मोक्ता **प्रच्छेश्छात्** प्रच्छतेः अस्मात्परस्य
असार्वधातुकस्य इट् न भवति प्रष्टा छ्वोःशूडिति षः ना
वर्गस्य टेतिनाटः **यजिसृजिमस्जिभजि**

भञ्जिभ्रस्जिभुजियजिसृजिमस्जित्यजिसृ
जिनिजिविजिसञ्जेः॥ भुजिर् योगे युजसमा
धाविति वा रुजो भङ्गे रञ्ज रागे भञ्ज सेवायाम् भञ्जो आ
मर्दने भ्रस्ज पाके भुज पालनाभ्यवहारयोः भुज कौटिल्ये
इतिवा यज देवतापूजा षञ्ज परिष्वङ्गे टुमस्जो शुद्धौ त्यज
हानौ सृज विसर्गे णिजिर् शौचपोषणयोः विजिर् पृथ
ग्भावे षञ्ज सङ्गे एभ्यः परस्य असार्वधातुकस्य इट् न भ
वति योक्ता रोक्ता रङ्क्ता भक्ता भङ्क्ता भ्रष्टा भष्टा भ्रज्जेः
भ्रज्जादीनां षश्चान्तेति निर्देशाद्वा भ्रज्जादेशः भर्ष्टा इत्यत्र
स्कोः संयोगाद्योरिति सलोपः भोक्ता यष्टा परिषक्ता
मङ्क्ता त्यक्ता स्रष्टा सृजिदृशोरागमकारः मस्जादीनां
घः नेक्ता वेक्ता सङ्क्ता॥ तुदिक्षुदिखिदिस्विद्यतिवि
द्यतिविन्दतिविनत्तिछिदिभिदिपादिसदिष
विस्कन्दिहदिस्विदेदात्॥ तुद व्यथने क्षुद सं
पेषणे खादिर् संपेषणे ष्विदा गात्रप्रक्षरणे विद सत्ताया
म् विद्लृ लाभे श्नुवादेशागमो नकारः विद विचारणे स्व
प्नुयादेः परो न षाद्यः छिदिर् द्वैधी भिदिर् विदा श
द्लृ शातने षद्लृ विशा पदगतौ स्कन्दिर् शोषणे हद पु
रीषोत्सर्गे ञिदभ्यग्रे विद्वेत्वेष्य विद परितापे इतिवा
एभ्यः परस्यासार्वधातुकस्य इट् न भवति तोत्ता नोत्ता
खेत्ता स्वेत्ता वेत्ता वेत्स्यते छेत्ता भेत्ता शत्ता सत्ता पत्ता
स्कन्ता हत्ता श्रद्धा वेत्ति वेत्तिर्ज्ञानार्थः मेट् वेदिता
राधिरुधिक्रुधिक्षुधिबुधिवधिसिध्यतिशुधि

ग्रुधिक्षुधिसाधेभ्योत्   राधसाधसंसिद्धौ कथिर्
श्चा क्रथकोपे व्यथव्यथतायाम् बन्धबन्धने ग्रुधशोचे
षिधुसंराद्धौ शुधशौचकर्मणे शुधसंश कथता साधित
कः एभ्यः परस्यासार्वधातुकस्य इट्नभवति राद्धा रो
द्धा क्रोद्धा क्षोद्धा बन्द्धा शोद्धा सेद्धा बोद्धा योद्धा स्वद्धा
साद्धा वक्ष्यमाणेभ्य इतितस्यथः भ्रषांत्तीयस्थानंधेइति
दः सिध्यतीतियनानिर्देशात् षिधुसंराद्धाविष्यति
धिधोनभवति सेधिता   हन्मन्यतेर्नात्   हन
हिंसा मनज्ञाने आभ्यांपरस्यासार्वधातुकस्य इट्नभव
ति हन्ता मन्ता मन्यतिग्रहणात् मनुअवबोधने इत्य
स्मात्तन्नभवतीतिप्रेषः मनिता   आपिवपिशुति
पिवपिवपिशादिक्षुपिलिपिलिपिविलुपिसृपेः
पात्   आप्लृव्याप्तौ तपसन्तापे तिपृक्षरणे शिपत्
क्षायने डुवपबीजसन्ताने षापषाक्रोशे क्षुपसंवरणे
लिपउपदेहे लुपृच्छेदने सृप्लृगतौ एभ्यः
परस्य असार्वधातुकस्य इट्नभवति आप्ता तप्ता ते
प्ता वप्ता शप्ता क्षोप्ता लेप्ता लोप्ता सर्प्ता
यभिरभिलभिभ्यो मात्   यभविपरीतमैथुने र
भराभस्ये डुलभष् प्राप्ता एभ्यःपरस्य असार्वधातुकस्य
इट्नभवति यब्धा रब्धा लब्धा वक्ष्यमाणेभ्यइतितस्यथः
भ्रषांत्तीयस्थानं   यमिरमिनमिगमेर्मात्
यमउपरमे रमक्रीडायाम् णमप्रह्वत्वे गम्लृगतौ ए
भ्यःपरस्यासार्वधातुकस्य इट्नभवति यन्ता रन्ता न

ला गत्वा रिषिरुषिक्रुशिविशिलिशिदि
शिदृशिस्पृशिमृशिदंशेः क्त्वात् रिषिरु
षादिस्वार्थः क्रुश आह्वाने रोदने च विश प्रवेशने लि
श अवयवे दिश अतिसर्जने दृशिर् प्रेक्षणे स्पृश सं
स्पर्शे मृश आमर्षणे दंश दशने एभ्यः परस्य सार्वधा
तुकस्य इट् न भवति रेष्ट्वा रोष्ट्वा क्रोष्ट्वा वेष्ट्वा लेष्ट्वा दे
ष्ट्वा दृष्ट्वा स्पृष्ट्वा मृष्ट्वा अनुदात्तस्य चर्दुपधस्यान्यतर
स्यामिति वा अकारागमः स्प्रष्ट्वा म्रष्ट्वा दंष्ट्वा त्विषि
शुषिकृषिश्लिषिद्विषिपिषिविषिशिषिशुषि
तुषिदुषेः क्त्वात् त्विष दीप्तौ शुष शोषे कृष
विलेखने श्लिष आलिङ्गने द्विष अप्रीतौ पिष्लृ संचूर्णने
विष्लृ व्याप्तौ शिष्लृ सर्वोपयोगे शुष शोषणे तुष प्री
तौ दुष वैकृत्ये एभ्यः परस्य सार्वधातुकस्य इट् न भव
ति त्विष्ट्वा शोष्ट्वा कृष्ट्वा क्रष्ट्वा अमवदकारागमः श्लेष्ट्वा
द्वेष्ट्वा पेष्ट्वा वेष्ट्वा शेष्ट्वा शोष्ट्वा तोष्ट्वा दोष्ट्वा वस
तिघसेः क्त्वात् वस निवासे घस्लृ अदने अदेर्घस्लृ
वा आभ्यां परस्य सार्वधातुकस्य इट् न भवति वस्त्वा घ
स्त्वा जिघत्सति अत्तुमिच्छति सन् अदेर्घस्लृ सस्य से
सार्वधातुकतः द्वित्वं अभ्यासकार्यम् सन्यवर्णस्येति
इत्वम् वसतीति अनानिर्देशात् वस आच्छादने इत्य
स्यापि इकारागमो न भवतीति विशेषः वसित्वा वस्त्रम्
दहिदिहिदुहिमिहिरुहिलिहिनहिवहेर्हो
ढः दह भस्मीकरणे दिह उपचये दुह प्रपूरणे मिह सेचने

ऋद्धवीजजल्मति लिदञ्चास्वादने लादवन्यने यदञ्चाप
णे एभ्यः परस्यासार्वधातुकस्येड्नभवति दध्या दे
ध्या दाम्या दादेर्घइतिहस्यधः बदधभेभ्यइतितस्य
धः भुदंतात्तृतीयश्चतुर्थे मेधा रोधा लेधा नद्धा दोधु
नदेर्धः धामवत्त्वतृतीयो वाधा सद्दिवदोरादवर्णो
स्य कत्वधत्वदवर्गलोपाः धामवत् **गहगुहोःस
नि** ग्रहउपादाने गुहसंवरणे अनयोः सनिपरे इ
ड्नभवति जिघृक्षति जुघुक्षति ग्रहिस्वपिप्रच्छामिति
संप्र हादः घोषाकः सनीतिकिम् ग्रहीता इटोदीर्घः
गुहिता गोहुरुपधायाः **उवर्णगुपादिभ्य
श्च** उवर्णान्तेभ्यः धातुभ्यः गुपादिभ्यो गुपिकित्
मानवधदाम्शान् एभ्यश्चसनिपरेइड्नभवति उव
र्णान्तेभ्यस्तावत् रुरूषति तुतूषति बुभूषति स
स्तूषति स्वरान्तानां सनीतिदीर्घः गुपादिभ्यः जुगुप्स
ते तितिक्षते चिकित्सते मीमांसते बीभत्सते दीदांस
ते शीशांसते **भुवःसिल्लुकि** भूसत्तायामि
त्यस्यसिल्लुकिसति परस्यसार्वधातुकस्येड्नभव
ति अभूत् अभूः इत्यस्यादाविवतीतिसिचोलुकि सिल्लु
कीतिकिम् व्यत्यभविष्ट कर्तरिकर्मव्यतिहारेआत्मने
पदम् **कृसृभृवृस्तुद्रुस्रुश्रुवएवपरोक्षाया
म्** डुकृञ् करणे सृगतौ डुभृञ्धारणपोषणयोः
वृञ्वरणे इतिवा वृइतिवृङ्वृञोर्ग्रहणम् ष्टुञ्स्तुतौ
द्रुगतौ स्रुगतौ श्रुगतौ एषामेवपरोक्षायांपरस्याम्

इड्न भवति अन्येषामनिटामपि भवत्येव चकृव च
कृम ससृव ससृम बभृव बभृम ववृषे ववृढ्वे द्र
द्रु. दुद्रुव दुद्रुम तुष्टुव तुष्टुम उड्डुव उड्डुम सुस्रुव
सुस्रुम शुश्रुव शुश्रुम **घस्लृकारात्**
ऋकारान्ताद्धातोः थलि इड्न भवति पूर्वेणानेय
मनप्राप्तः जहर्थ दधर्थ स्मृ सस्मर्थ **कृञोः**
**सुटः** सुडागमसहितस्य कृञः परोक्षायां इड्न भव
ति चकृम चकृव चकृम सुडागमसहितस्य कृञः
इड्भवत्येव संचस्करिथ संचस्करिव संचस्करिम उ
नरसूत्रेणाकारस्वेवस्मरणादभ्यासव्यवधानेपिकारस्
वेलह् वमयोर्वेकव्याकरणः **संपर्युपेभ्यः**
**करोतौ भूषणे समवाये च** संपरि उप एभ्यः
परस्मिन्करोतौ सुडागमो भवति भूषणे समवाये च
गम्माने भूषणमलङ्करणम् समवायः सङ्घातः ट
कारग्रहणान्नोटकिताविषयर्थः संस्करोति परिष्करोति
उपस्करोति समस्करोत् संचस्कार समवषीत्यामेष्यिते
यथाविधि स्यात् दि यह् अभ्यासस्य शिरोरोचोषः
संपर्युपेभ्य इति किम् अलंकरोति भूषणे समवाये च
ति किम् सङ्कृतिः परिकर्म उपकारः **इनिलत्वह**
**नावाल्योतप्रकरणे सुडागमपादः समसः**
**७ ओपदान्तेपूर्वाश्रपः** पदान्ते वर्तमाना
नां पूर्वाश्रयो भवति अपठत अपटत् असमाद्ये
गुणेहाने सर्वोपादिः अज्ञादीनां तिजसपः तथा

नेन अदङ्गघामूर्धन्या इति स्याने सावर्ण्यात् अघस्मः॥
**रसकारयोर्विसृष्टः** पदान्ते वर्त्तमानयोः रेफ
सकारयोर्विसृष्टो विसर्जनीयो भवति अजागः अधत्तः
पदान्ते किम् जागर्षि शास्सि **घढधभेभ्यस्त**
**थोर्धोऽधः** घढधभेभ्यः परयोस्तकारथकारयोः
धत्वं भवति अधः धाञः परयोस्तु न भवति अदुग्ध अदु
ग्धाः अलीढ अलीढाः लवगाडढादिढलिङ्ढ्रहामात्म
नेपदे ढलोपे इति सणो लुक् अदुग्ध अदुग्धाः अलब्ध अल
ब्धाः अटस्थधुटीति सिचो लोपः घढधभेभ्य इति किम्
अभित्त अभित्थाः न धोऽधीति किम् अधुक्षाताम् सेद
ध्वम् धः अध इति किम् धत्तः धत्थः वत्तः नम् पर् अनि
जहात्यादेश्चेति लुक् जहात्यादीनां सार्वेति ह्रिवे अभ्य
स्तानामाकारस्येत्यालोपः नधोऽश्वधातेरिति दध्वधः
**षढोः कः से** षकारढकारयोः कत्वं भवति सका
रे परे पेक्ष्यति लेक्ष्यति पिष्लृ संचूर्णने लिह आस्वादने ष
ढोरिति किम् भेत्स्यति स इति किम् पिनष्टि लेढि
**तवर्गस्य षटवर्गाट्टवर्गः** षकारटवर्गाभ्यां प
रस्य तवर्गस्य टवर्गादेशो भवति षात् पेष्टा वेष्टा टव
र्गात् ईट्टे लेढि ढे ढलोपो दीर्घश्चोपधायाः ढकारस्य
ढकारे परे लोपो भवति उपधायाश्च दीर्घः अलीढ अमू
ढ लिह आस्वादने गुहू संवरणे अर्थ ने सम् लवगाडढ
दिढलिङ्ढ्रहामितिलुक् ढोढः घढधभेभ्य इति तस्य
धः ष्टुत्वेन धस्य ढः अनेन ढलोपः उपधायाश्च दीर्घः

सहिवहोरोदवर्णस्य सहमर्षणे वहप्रापणे
अनयोः ढलोपे कृते अवर्णस्य ओत्वं भवति सोढा वोढा
सहतु ला अनेन अकारस्य ओत्वम् उदवोढाम् वहप्रा
पणे उत्पूर्वः अथ लाम् सिद्ध ष्टुत्व ष्टीति सिद्धोलोपः
ढो ढे धत्वढत्वलोपाः प्राग्वत् अनेन आकारस्य ओत्व
म् सहिवहोरिति किम् गाढः गाहू विलोडने तिष्ठति
क्षः नदीत्स्पर्शीत्स्व ब्धेषीडभावः धत्वढत्वादि प्राग्व
त् अवर्णस्येति किम् ऊढः स्वपिवचीति संप्र सारणे ढे
लोपादीर्घस्येति दीर्घः धुटां तृतीयश्चतुर्थे
धुटां चतुर्थे परे तृतीयो भवति दोग्धि दादेर्धः चधप
भेभ्य इति तस्य धः अनेन घस्य गः चकाद्धि अध्यक्षोदेर्ध
स्य स्थान सावर्ण्यात्तृतीयादः अघोषेष्वशिटां
प्रथमः अशिटां शिड्वर्जितानां धुटां प्रथमो भवति
अघोषेष्वपरेषु अजिगमत्सि ति सि अदाड्यादेः परो
नपाद् अनेन तः अशिटामिति किम् पोष्ट वस्ता
अस्य वमोर्दीर्घः अस्य वकारमकारयोः परयोः
दीर्घो भवति पचावः पचामः अस्येति किम् इवः इमः
वमोरिति किम् पचति स्वरान्तानां सनि स्वरा
न्तानां धातूनां सनि परे दीर्घो भवति चिचीषति अस्तूष
ति चिकीर्षति स्वरान्तानामिति किम् पिपठिषति सनीति
किम् चिनोति हनिगमिङोरुपधायाः हन
हिंसागत्योरित्यस्य गम गत्यो इङ् अस्य सनि परे उपधा
याः दीर्घो भवति जिघांसति अधिजिगांसते हन् इङ्

इस्तीमिच्छति अथोनम् सन् द्विर्वे अभ्यासस्येति इस्यासः
गुरुः यथि पूर्वः सनीति सिद्धोर्यामितिरिति यस्यादेशः द्वि
र्वचनादिप्राप्तवत् अनेन उपधादीर्घः नकारमकारयोर
नुस्वारः नामिनो र्वोरकुर्छुरोर्व्यञ्जने व्य
ञ्जने परे यौ वौ रेफवकारौ तयोः परयोः नामिनो दीर्घो
भवति अकुर्छुरोः कुर्छुरकवर्गान्तस्य उभिकारो
कृतगुणस्य अस्योकार इति उकारे कृते कुर्छुरोर्दीर्घत्वं
न स्यात्‌वचनं भवतीत्यर्थः निष्ठीवति स्फूर्यते स्फुर्दिसायाम
पूर्यालनपूरणयोः वर्णते यथा सदनस्येव उर्वोरपि
पयस्योवेस्तूर् अनेन दीर्घः दीव्यति दिवुक्रीडादि दि
वादेर्यन् मूर्छति पूर्छति कुर्दकोर्दादिल्ये अर्दोमोदस्र
शुक्लायपयोः आकार आदन्तवन्धात्यर्थः नामिन इति
किम् स्तर्यते स्तरविनाशायाम् उणोर्भिसंयोगात्योविरिति
णः अव्यते अवरक्षणेवौरिति किम् भियते अकुर्छु
रोरिति किम् कर्यात् कुर्यात् कुरु कुरु समस्तीयात् न
नादेकः करोतिरिति णः अस्योकारः समसंयोगेति
उवकारलोपः व्यञ्जने इति किम् किरति अवति क
विश्लेषे रक्षणे अति त्वरादेरनीति गुणाभावः कुद
न्तयोर् स्वरादाविवर्तोऽस्त्र समानात्स्त्वमोदेनः
मकारस्यनत्वंभवति स्यसत्यादिप्रत्ययपरे अचकात्
अनघ्रात् अनिर्मीम् चकास्तदीप्तावसत्र अत्र पूर्वः
त्यक्ता दि अपि लक्ष अनेन मस्यनः व्यञ्जनादिस्योरि
ति दिलोपः स्यसत्यादिति किम् अचकासीत् अयतनीदि

षिद् इट् ईट् इटश्चेटीति सिज्लोपः    अड्धात्वादि
र्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु    धातोरादिर
कारागमो भवति ह्यस्तन्यद्यतनीक्रियातिपत्तिषु परत
ः अपचत् अपाक्षीत् अपक्ष्यत् अपचत अपक्त अप
क्ष्यत ह्यस्तन्यादिष्विति किम् पचति    स्वरादीनां वृ
द्धिरादेः    स्वरादीनां धातूनां ह्यस्तन्यादिषु परतः
आदेर्वृद्धिर्भवति ऐच्छत् ऐच्छत ऐधत् ऐहत इत्यस्या
याँ ईक्षाञ्चक्रुयाम् उषदाहे ऊहवितर्के ह्यस्तन्यादिन प
वम् ऐषीत् ऐहिष्ट    अस्तेरस्याकारः    आ
देरित्येव आदेर्वर्णस्य आकारो भवति ह्यस्तन्यादिषु
परतः आसीत् ह्यस्तनीदि आस्त्विषक असेर्दिस्योरितीट्
आसत् आसिष्ट आस्त्वामो अथ हि भ्वादिस्वेता
ल् अटपटगतौ क्रियातिपत्तिः स्यात् इट्    अस्तेः
असभुवीत्यस्य ह्यस्तन्यां परस्यां आदेर्वर्णस्य आकारो
भवति पूर्वेणासिद्धे अस्तेराद्वेरिति प्राप्तस्य आदिलोप
स्य बाधार्थं वचनम् आस्ताम् आसन् ह्यस्तनाम् अन्
आन्विलक पतेर्ये इणगतावित्यस्य यकारस्यादित्य
वे आकारआगमो भवति आयन् इणगत ह्यस्त अन्
अन्विलक इणश्चेतियत्वम् अनेनाकारागमः
नामामास्मयोगे    माशब्देन मास्मशब्देनचयो
गसति धातोः ह्यस्तन्यादिषु अकारागमादि यदुक्तं तन्न
भवति मापाक्षीत् मास्मपचत् मा ईक्षिष्ट मास्मैक्षत
माङ्योगे अद् न मास्मयोगे ह्यस्तनी न मास्मस्ताम् ।

मासमयन् मस्न नाम् अन् अनेनादेरिति अलोपः इ
त्यादेतियत्नम्   **नाम्युपाद्धातोराशीरद्यतनी**
**परोक्षासु धोढः**   नाम्यन्ताद्धातोः आशीः अ
द्यतनीपरोक्षासु धकारस्य ढकारो भवति चेषीढ्
म् अचोढ्वम् अस्ताढ्वम् चकृढ्वे लुलुढ्वे विसृढ्व सुषूरा
ढ्वम् कृष्यत आशीः सीधम् अद्यधम् सिचोधकारेइ
तिकिचोलोपः अतः परोक्षाधे द्विर्व अभ्यासकार्यम्
कुञोभ्यासस्याधिकारेचोषः निमित्ताभावेनैमित्तिक
स्याप्यभावः इति टकारेनिवृत्ते तथाहेवधिष्यते ना
म्यन्तादिति किम् पक्षीधम् अपचधम् विभिद्वे आशीः
सीधम् अद्यधम् परोक्षा धे चवर्गस्यकिमुटोतरितीयम्
वर्षे भिदादिर्द्विर्वचनादि धातोरितिकिम् चासिषीधम्
अद्यथाशुर्ननाम्यन्तः आशीरादिष्विति किम् स्तधेस्तधम्
वर्तं धे पच धम् श्रविलुक   **मृजोमार्जिः**
मृजूष् शुद्धावित्यस्य गुणोक्तेनेयत् मर्ज् इतिरूपंतस्य
मार्जे आदेशोभवति मार्ष्टि मार्ष्टु अमार्ट् ति तस्य
दि अन्विलुक अतः अनेनमार्ज मृजादीनांषइतिजस्य
षः व्यञ्जनादिस्यादिरितिदिलोपः षस्यपदान्तेधुटोप्रथम :
टः मार्ष्टा मार्जिता क्रदरुवन्यवाहेद् मार्जेइतिकिम्
मृष्टः वर्तमाना तस् द्विवचनस्येवादिरितिगुणाभावः स
गुणाइतिकिम् मार्जयन्ति मृजन्तेपक्षेइत् अतोक्त
तेमार्जादेशः   **धात्वादेःषःसः**   षत्वेन्सेवप

षेधात्वादेः सकारो लक्ष्यः ते उपदेशे धातुपाठे षादयः प
ठ्यन्ते किन्तु ष्विदू स्नेहने ष्विदा गात्रप्रस्रवणे ष्वद आस्वादने
ष्वञ्ज परिष्वङ्गे ञिष्वप् शये एतेच स्वरगेषु षकारेषु
ष्वष्क्क आदने ष्यस्ज्यमर्षे सेष्ठ गत्यर्थः स्वगौ स्वस्वगतौ
ष्टभु स्तम्भु हिंसायाम् एते स्वरदन्त्यपराः षादयोऽप्युपदेशे
न षादयः ष्ठिवु ष्वष्क गतिसङ्घातयोः षेवृ सेवायाम् ष्वक
स्वक प्रतिघाते ष्टगे स्यगे संवरणे एते स्वरदन्त्यपराः षादयो
पि षोपदेशाः सोपदेशाश्च पठ्यन्ते तथाहि स्मिवृद्धैः परिभा
षितम् अज्दन्त्यपरसादयः षोपदेशाः स्मिस्विदिस्वदिस्वञ्जिस्व
पश्च सृपिसृजिस्तृस्त्यासेकृसृवर्जम् उ
भयथा त्वास्तेह्लकस्य कस्यापि न लोऽइति तत्र षोपयोगे
साध्यो धात्ववः कार्यार्थं षादय उपदिश्यन्ते तेषामादेः
षकारस्य सत्वं भवति सहते सेवते सिंचते सिञ्चन्ति षु
णादेशासीनकारः सिषेच निषिध्यात्मनयतिषध्वम्
धातोरिति किम् षट् षोडश इति किम् कथति कथहिंसा
र्थः नामधातोः ष्टिवनिरसने षकारादयः ब्रूनयोर्मनभ
वति नसृष्यानछि उषकारमिति घण्डमिच्छयात्मनः ष
ण्डीयति षीवति षिव्वक्ष्माच मामनीति दीर्घः षका
ने णो नः येनादयः प्रयोगे धातव उपदेशे णाद
यः उपसर्गादसमासेऽपि णोपदेशस्येति उपसर्गादेका
दशस्य णकारस्थानीयस्य नकारस्य णत्वं वाच्यं तेषा
मादेः णकारस्य नत्वं भवति नेषति नीगात्रविक्षेपे नृम
र्दिनमति नक्कहिंसार्थः नर्दधातुः नाम धातोः ष्मा

ऐश्वर्येषु नाष्टनाम्यर्थेषु नये ज्ञानज्ञौ इत्यर्थः नटधातुरिव
ये एते हर्जिताः परिभाषिताः नृतिनाटिनाक्रिमार्दिनाम्
माधन्तु नाजिनदिभ्यो नो नाट्योपदेशा इति नयति न
मति प्रणायति प्रणमति नाम्याती नैष्यते णकारादि
त्वात्मनः णकारी यति निमित्तात्प्रत्ययवि
कारागमस्थः सिः षत्वम् निमित्तात्परः सका
रः प्रत्ययविकारागमस्थः प्रत्ययस्थः विकारस्थः आ
गमस्थश्च षत्वं प्राप्नोति सेोष्ठि वाक्षि विभर्षि इति प्रत्य
यस्थः विकारस्थो यथा सिषेव आगमस्थो यथा पः
स्किरोति सर्वं पश्यन्ति सङ्गायामः निमित्तादि
ति किम् पचसि प्रत्ययविकारागमस्थ इति किम् पे
मति ति अविषयपाठः प्रादुःसिवुसहां स्तो
च प्रादुरुपसर्गिभ्यो परस्य सिवुसहेः पक्षा
न्तः सकारस्य निमित्तात्परस्य षत्वं भवति प्रादुःषन्
सीव्यः सिषिवान् उपसेह उषितः उषितवान् जगृहुः
जगृहः प्राविशेरिड्यथाया इति इत्वम् हयोः निष्कासयेति
इड् स्वाधिवचीति संप्र हयोः गमहनेति धातोः उ
पधाया इति लोपः स्तौतीण्यन्तयोर्वे
वपाणि ण्यन्तौ स्तौति ण्यन्तः सकारस्यैव निमित्त
नि णसः स्तनस्य च धातोः यः सकारः तस्यैव निमित्त
परस्य सन्नवर्गे णिपरे षत्वं भवति नान्यस्य तुष्टव
ति स्वापनान्यस्य नीतिदीर्घः सिषेवयिषति सुष्वापयि
षति सुतिष्ठापयिषति अभ्यासस्यैव स्तौती

अन्येषामिति किम् सिद्यनिमाति सनित्वमिच्छतीति स
न् ग्रामदाने सनोतीति किम् निमासति सनुमाति ग्र
हि स्वापि पच्यां सनीति धातोः सेव स्पादक्षिच्छति स्वयति
च्छतिवत् **लुग्लोपे न प्रत्ययकृतम्** लुका
लोपेन यः प्रत्ययो लुप्यते तस्मिन् यत्प्राप्तं कार्यं येषामेतन्न
भवति प्रत्ययलक्षणेन प्राप्तम् गर्गाः अत्रो लुकि कृ
ते आदिवृद्धिर्न भवति कति जसो लुकि कृते अये:इरे
डीजसीति एत्वं न भवति नरीनर्ति चेक्रीयितलुकि कृ
ते चेक्रीयितकार्यं द्विर्वचनादि भवत्येव विरेफो व
दतीति अभ्यासस्य रिफागमकारणात् **स्वर
विधिः स्वरे द्विर्वचननिमित्ते कृते द्विर्वचने**
द्विर्वचननिमित्ते स्वरादेशप्रत्यये यः स्वरस्य विधिः
प्राप्तः सद्यादौ द्विर्वचने कृते सति पश्चाद्भवति पपतुः
पपुः जग्मतुः जग्मुः अत्र परोक्षत्वादालोपोपधालो
पो यद्यादौ स्यातां तदा एकस्वरत्वाभावाद्द्विर्वचनं न
स्यात् आटिटत् अट पट गतौ अटतेः प्राग्वत् इन् अ
टि इति स्थिते अत्र टि वारं यद्यपरत्वादादौ स्वरवि
धिः कार्यः तदा इलोपः स्यात् तदा द्वितीयस्यैकस्वरस्य द्वि
र्वचनं न स्यात् स्वरविधिरिति किम् आपिपत् अत्र णौ
यः पीपरोत्तायामिति पी आदेशो न स्वरविधिः व्यञ्जन
विधिरेव स्फायीओप्यायी ह्रस्वो व्यञ्जनपरत्वादादौ पी आ
देशे कृते पश्चाद्द्विर्वचनम् स्वरे इति किम् जेघ्रीयते
अत्र घ्राध्मोरी इति आकारस्य ईकारः स्वरविधिः चेकी

यिते व्यञ्जनादाद्यस्य सत्वादादेशो भवति पश्चाद्द्विर्वचनम्
द्विर्वचननिमित्ते इति किम् उदूयति दिवुक्रीडाविजि
मिच्छति सत्र् च्छ्वोः शूठ्पञ्चमे चेति वस्य ऊठ् स हि द्विर्व
चनस्य न निमित्तम् अतस्तस्मिन्परे इवर्णो यणिति यत्वं
स्वरविधित्वादादेशो भवति पश्चाद्द्विर्वचनम् **अनुब
न्धोऽप्रयोगी** यः शब्दः अप्रयोगी यस्य लक्षणस्य प्रयो
गेनानुक्तकार्यार्थं उपलक्षणभूत उच्चार्यते सोऽनु
बन्धसंज्ञो भवति अनुबन्धसंज्ञायाः प्रयोजनं कृञ्
बन्धाद्घञ् कृत्वत्वाद्विमत्केनानित्ये इत्यादिषु क्रि
त्रिमम् **घिडिति घादयः** घादयो घ
वर्णा हि धौ शिदिति संज्ञा भवति धिसंज्ञायाः
प्रयोजनम् साल्लिटड्यादिषु आलिङ्गत् अग्र दि
लात् कल्पकाले **संप्रसारणं यवोरन्त्याति
मित्ताः** अन्तस्थायां यवानां निमित्तं प्रकृतिः ते
ह्रतः इकार उकार ऋकाराः संप्रसारणसंज्ञा भवन्ति
संप्रसारणसंज्ञायाः प्रयोजनम् सपरस्वरायाः सं
प्रसारणमन्तस्थायाः इत्यादिषु इज्यते उच्यते गृह्य
ते यज्ञदेवता उपवीत गृहउपा यजिवप्योः स्व
पिवाश्वयज्ञादीनामिति यकारस्य सस्वरस्य संप्रसार
णम् इकारः वकारस्य उकारः ग्रहेः ग्रहिज्यावयी
तिरेफस्य ऋकारः ह्रतिइति किम् ऋवतः ऋवः अन्त
बस्यान्तरस्थाकिलीति तत्वालरान्नयेः यकारस्य व
कारः परस्मात्संप्रसारणात्पूर्वं प्रवर्तते तस्य यादेस

प्रसारणसंज्ञा स्यात् न संप्रसारणमित्यादि वकारस्य
संप्रसारणं न स्यात् **अर्पूर्वे सन्ध्यक्षरे गुणाः**
ऋवर्णो अर् इत्ययं यः अरशब्दः तस्मात्पूर्वे ये सन्ध्यक्षरे
ते अवर्णः इवर्णे ए उवर्णे ओ इत्येकारओकारौ ते गुण
संज्ञा भवन्ति गुणसंज्ञया प्रयोजनम् नामन्तयो
धातुविकरणयोर्गुण इत्यादिषु चेता स्तोता कर्ता
**अकारे च वृद्धिः** अरिति वर्तमानमर्थवशाद
विपरिणम्यते आरशब्दः पूर्वसूत्रनिर्दिष्टादरउत्तरे
सन्ध्यक्षरे एकारे ऐकारे च ओकारे औकारे चेति ये
कारऔकारौ च वृद्धिसंज्ञा भवन्ति वृद्धिसंज्ञायाः प्रयो
जनम् वृद्धिरादौ सणे इत्यादिषु कार्पणम् वैडूर्यम्
औपगव्यम् यस्यापत्यस्येति [illegible] कादाकारस्यापि वृद्धि
संज्ञा वा सिद्धः **इति लघुसूत्रे आख्यातप्रक**
**रणे प्रसादोद्यमः ८ आख्यातप्रकरणं**
**समाप्तम्**

नोट्फ्यकश्मीर यन्त्रालय में छापा लिखितं पंडित
हरीराम मेण संवत् १९२४ शुभमस्तु सर्वजगताम्